॥ षट्प्रश्नटीकाप्रारंभः ॥

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ हरिःॐ ॥ [illegible]तुनःपद्मनाभस्यश्रीपदा[illegible]
कमलाकबरीभारसुरभीकरणोद्यताः ॥ इहखलु संसारपारावारेनिपतितमधिकारिजनं जननीतनयमिव परमात्मतत्वज्ञानप्लवेनो
द्दिधीर्षुरियमाथर्वणीब्राह्मणोपनिषत् इतिकर्तव्यतामंतरेणनतत्वज्ञानकारणतामापद्यते। अतःतदितिकर्तव्यतारूपन्थायगर्भंभाष्यं
करिष्यन्नाचार्यः प्रारिप्सितपरिसमाप्त्यादिप्रयोजनामेतदुपनिषत्प्रतिपाद्यदेवताप्रणतिमादौनिबध्नाति ॥ नमइति ॥ नानिर्धारि
तस्वरूपस्यप्रणामोयुक्तः । नचांतरेणलक्षणंवस्तुनिर्धारणमित्यतो वासुदेवस्यलक्षणमाह ॥ प्राणादीति ॥ वक्ष्यतेहि समिथुन
मुत्पादयते रयिंचप्राणंचेत्यादिना । नचप्राणादिजननेनास्यकिमपिप्रयोजनंशंकनीयं पूर्णानंदत्वादित्याह ॥ अमंदेति ॥ एतच्च
यत्तच्छांतमजरमित्यादिना । नचैवंप्रवृत्त्यनुपपत्तिः। तत्स्वाभाव्यादितीष्णुचप्रत्ययेनोक्तं। एतदप्युत्पादयतइतिवर्तमानापदेशेन।
प्राणादिप्रभविष्णुनासर्वज्ञेनभवितव्यं तदप्यस्तीत्याह ॥ वेधसइति ॥ इदमपि एषहिद्रष्टेत्यादिना । अत्रचभगवान्वासुदेवए
वोपनिषत्प्रतिपाद्यः प्राणादयस्तुतच्छेषतयेतिसूचितं । अमंदानंदसांद्रताकथनेनपरमानंदाविर्भावलक्षणमुपनिषदुत्पादितज्ञानफ
लंच । तंयथायथोपासतेतदेवभवतीत्यादिश्रुतेः । वक्ष्यतिच तेषामसौविरजोब्रह्मलोकइति । अतोयुक्तमेव विषयप्रयोजनवदेत
दुपनिषदोव्याख्यानमिति । अथ प्रजेत्यादिवाक्यव्याख्यानमपव्याख्याप्रत्याख्यानंचलाघवेनचिकीर्षुः संक्षेपतस्तावत्प्रथमप्रश्न

भा० । ॐ नमोभगवतेतस्मैप्राणादिप्रभविष्णवे ॥ अमंदानंदसांद्रायवासुदेवायवेधसे ॥ १ ॥

प्रतिवचनसमाख्यारूपांस्मृतिमेवपठति ॥ प्रजानामित्यादिना ॥ अत्रादौसुकेशाइत्याद्याख्यायिका विद्याप्रशंसयाश्रोतृणांश्र
द्धाद्यतिशयजननार्था । एवंकिलमहद्भिर्भारद्वाजप्रभृतिभिरपीयंविद्या सांवत्सरब्रह्मचर्यादिनालब्धाऽतोतिप्रशस्ततरा अस्माभि
रप्येवंविधैर्भाव्यमिति । स्मर्यतेहिश्रद्धादीनांतत्वज्ञानहेतुत्वं श्रद्धावाँल्लभतेज्ञान [गीता ४ । ३९] मिति ॥ तत्रेयमक्षरयो
जना ॥ सुकेशानामतः भरद्वाजस्यापत्यंभारद्वाजः । शिबेरपत्यंशैब्यः सत्यकामोनामतः । सूर्यस्यापत्यंसौर्यः तदपत्यंसौर्याय
णिः । दीर्घःसुलोपश्चछांदसइति सएवसौर्यायणी । गर्गस्यगोत्रोगार्ग्यः । कौसल्योनामतः कोसलायांभवोवा । अश्वलायन
स्यापत्यंआश्वलायनः । भृगोरपत्यंभार्गवः विदर्भेषुभवोवैदर्भिः । कबंधीनामतः कत्यस्यापत्यंकात्यायनः इतरेतरयोगेचशब्दाः।
तएतेहकिलब्रह्मपराः वेदाभ्यासेतात्पर्यवंतः ब्रह्मनिष्ठाः तदुक्तानुष्ठाननिष्ठाश्चमुनयः कदाचित्समवेताः परंब्रह्मवासुदेवमन्वेषमा
णाजिज्ञासवो बभूवुरितिशेषः । ब्रह्मपराइत्यादि ब्रह्मजिज्ञासाधिकारसंपत्तिकथनं । ततस्तेकिलैषपिप्पलादो यद्वयंप्रक्ष्यामस्तत्स
र्वंवक्ष्यति तस्मादेनंप्रतिगच्छामइतिनिश्चित्यसमित्पाणयोभूत्वा भगवंतं पूज्यं । पिप्पलादमुपसन्नाः तत्समीपंप्राप्ताः । हवैश
ब्दःपिप्पलादस्यप्रश्नप्रतिवचनसामर्थ्यप्रसिद्धिद्योतकः ॥ १ ॥ तानागतान्हकिलसऋषिःपिप्पलाद उवाच । किमिति । यद्यपियू

उप० । सुकेशाचभारद्वाजः शैब्यश्चसत्यकामः सौर्यायणीचगार्ग्यः कौसल्यश्चाश्वलायनः भार्गवोवैदर्भिः कबंधीकात्यायनः । तेहैतेब्रह्म
पराब्रह्मनिष्ठाःपरंब्रह्मान्वेषमाणाएषहवैत त्सर्ववक्ष्यतीतितेहसमित्पाणयोभगवंतंपिप्पलादमुपसन्नाः ॥ १ ॥ [illegible]

यंप्रागेवतपआदिसंपन्नास्तथापि भूयःपुनरेव तपसासर्वेद्रियानिग्रहलक्षणेन विशेषतोपिब्रह्मचर्य[illegible] श्रद्धयाऽऽस्तिक्य[illegible] युक्ताः संवत्सरमेकमस्मान्परिचरंतःसंवत्स्यथ सम्यग्वसत । ततोयथेष्टंप्रश्ना न्प्रष्टव्यार्थान्पृच्छत । युष्माभिःपृष्टंचप्रतिवक्तुंयदि वयंविज्ञास्यामः तर्हिसर्वंवोयुष्मभ्यंवक्ष्यामइति । नह्येवंसति अवचनेकारणमस्तीतिहशब्दः ॥ २ ॥ अथतदुक्तनियमानुष्ठानसम नंतरं । तेषांमध्येकबंधीकात्यायनउपेत्योपसदनंकृत्वा पिप्पलादंपप्रच्छ । पाठक्रमादर्थक्रमोबलीयानितिपश्चादुक्तस्यापिकात्याय नस्यप्रश्नप्रतिवचनंचप्रथममुक्तं । एवमन्यत्रापिद्रष्टव्यं । तंच क्रमंतत्रैवदर्शयिष्यामः । किमिति । भगवन्कुतोनिमित्तकारणात् पुरुषादिमादेवाद्याःसर्वाःप्रजाउत्पद्यंतइति । हवाइतिप्रजानांप्रजननस्यसुप्रसिद्धताद्योतकौनिपातौ । सुप्रसिद्धंतावत्प्रजानांप्रज ननं।नचैतदंतरेणकारणमुपपन्नं।सर्वदापिप्रसंगात्।नचाचेतनैरेवकारणैःचेतनानधिष्ठितानांकार्यकरत्वादर्शनात्।नचजीवोधिष्ठाता। अस्वतंत्रत्वात् । नापीश्वरः। तदनुपलंभादितिप्रश्नाशयः।यद्यपिनभगवान्सर्वेषांप्रत्यक्षगोचरोवर्तमानः कुलालइवघटंप्रजाःजनय ति । तथापिजगत्कारणीभूतान्प्राणादीनुत्पाद्य तेष्वाविश्यतान्निमित्तीकृत्यनिखिलाःप्रजाजनयतीतिनकश्चिद्विरोधइत्यभिप्राय वांस्तस्मैपृष्टवतेकात्यायनायसपिप्पलादःकिलोत्तरमुवाच। किमिति। प्रजानांब्रह्मादीनांपतिःपालकःपरमेश्वरः कल्पादौकिलात्मनः प्रजाकामो देवादिप्रजावत्त्वमात्मनइच्छन्नवर्तत अथससर्वज्ञोपिलोकविडंबनायतपोतप्यत कर्तव्यमन्वालोचयत् ॥ ३ ॥ आलो

उप० । भूयएवतपसाब्रह्मचर्येणश्रद्धया संवत्सरंसंवत्स्यथ । यथाकामंप्रश्नान्पृच्छत । यदिविज्ञास्यामःसर्वंहवोवक्ष्यामइति ॥ २ ॥ अथ कबंधीकात्यायनउपेत्यपप्रच्छ । भगवन्कुतोहवाइमाःप्रजाःप्रजायंतइति । तस्मैसहोवाच । प्रजाकामोहवैप्रजापतिः । सतपोतप्यत ॥ ३ ॥

चितकार्यश्चसप्रजापतिर्मिथुनंस्त्रीपुरुषरूपंद्वंद्वमुत्पादयते उदपादयत् । किंतत् । रयिं वित्ताभिमानिनींभारतीं । प्राणं मुख्यंचे त्येतत् । ननुसर्वाःप्रजाःसिसृक्षुःपरमेश्वरःकथंतौउदपादयदिति । एवंमन्यतेस्मप्रजापतिः एतौरयिप्राणौमेममबहुविधाःप्रजाःक रिष्यतइति । एतावाविश्याहंप्रजाःस्रक्ष्यामिइमौप्रजासर्जनेममनिमित्तीभविष्यतइति । अभूतांचतौप्रजापतेःप्रजासर्गेनिमित्त मित्युच्यते ॥ आदित्यइत्यादिना ॥ ततोसौप्राणःप्रजापतिनाआदित्यादिषुसृष्टेष्वादित्यःआदित्यनामाआदित्यंप्रविष्टोबभूव । रयिरेवरयिरपि। चंद्रमाःचंद्रमानाम्नी चंद्रमसमाविष्टाबभूव। एवंसूर्याचंद्रगतौतावाविश्य तौनिमित्तीकृत्य प्रजापतिःप्रजाःससर्जे तिवाक्यशेषः ॥ ४ ॥ तदेतदाह ॥ प्रजानामिति ॥ सूर्याचंद्रनामानौतौसूर्याचंद्रगतौचकारेतियोज्यं । प्रकारांतरेणतयोःप्रजो त्पत्तिनिमित्तत्वमुच्यते ॥ रयिर्वाइत्यादिना ॥ एतत्सर्वंरयिर्वै प्रमाणप्रसिद्धमेतत् । किंतत्सर्वं । मूर्ततेजोबन्नलक्षणं अमू र्तंचप्रकृत्यादिकमितियदुपादानकारणंराशिद्वयं तस्माद्राशिद्वयात्प्रविभक्ता यामूर्तिःयन्मूर्तं सैवरयिः । सप्तम्यर्थेवापंचमी । अ मूर्तंप्राणइतिशेषः । प्रकृत्यादिषुस्थित्वातेषामुपादानत्वशक्तिंप्रेरयंतौतौप्रजापतेःप्रजोत्पत्तौनिमित्तंभवतइतियावत् । तदिदमाह ॥ अमूर्तस्थइति ॥ ताम्वाविश्येतिसर्वत्रसंबध्यते । आदित्येस्थित्वाप्राणःप्रजोत्पत्तिनिमित्तंभवतीत्युक्तं । तत्कथमिति उच्यते

उप० । समिथुनमुत्पादयते । रयिंचप्राणंचेत्येतौमेबहुधाप्रजाःकरिष्यतइति । आदित्योहवैप्राणोरयिरेवचंद्रमाः ॥ ४ ॥ रयिर्वाएतत्स र्वंयन्मूर्तंचामूर्तंच । तस्मान्मूर्तिरेवरयिः ।

॥ अथेत्यादि ॥ अथशब्दःप्रकृतमूर्तादिप्रसंगादर्थांतरद्योतकः । आदित्यःआदित्यस्थःप्राणः उदयन्उद्गच्छन् प्राचींदिशं प्रका
शेनप्रविशतीतियत्तेन प्राच्यान्प्राणान्स्वरश्मिषुसन्निधत्तेसंनिवेशयति । स्वरश्मिभिस्तान्व्याप्नोतीतियावत् । एवंदक्षिणांदिशंप्र
विशतीतियत्तेनदक्षिणान्प्राणान्स्वरश्मिषुसन्निधत्तइत्यादियोज्यं । दिशोंतरादशदिशांमध्ये । अवांतरदिशांप्राच्यादिग्रहणेनैवगृ
हीतत्वात् । अन्यथाप्राच्यान्प्राणानित्यादिबहुवचनायोगात् । यत्सर्वमितिनिगमनं ॥ ५ ॥ अनेनाशेषजगत्प्रकाशकतयाप्रजो
त्पत्तिनिमित्तत्वमुक्तं । नकेवलमेतावत् । किंनाम सएषआदित्येस्थितोविश्वरूपःपूर्णरूपो ऽदनादग्निः प्राणोवैश्वानरोविश्वनरसं
बंधीतापनपाचनशोषणादिनासर्वप्रजोत्पत्तिहेतुःसन्नुदयते । आदित्योहवैप्राणइतियाप्रसिद्धिःसूचितासोच्यते ॥ तदेतदिति ॥
यदुक्तंतदेतदृचाविश्वरूपमितिमंत्रेणाभ्युक्तंस्पष्टमुक्तमतोदृढतरंप्रतिपत्तव्यमिति । विश्वरूपं । कराःरश्मयोस्यसंतीतिकरी तंक
रिणं । जातवेदसंजातस्यसर्वस्यवेदितारं । परायणंसर्वप्राणिनांपरमाश्रयं । एकंप्रधानं । ज्योतिःप्रकाशकं । तपंतंतपनक्रियांकु

उप० । अथादित्यउदयन्प्राचींदिशंप्रविशतितेनप्राच्यान्प्राणान्रश्मिषुसन्निधत्ते ।

भा० । प्रजानांपालनाद्विष्णुःप्रजापतिरितीरितः । सवायुंसूर्यनामानंचंद्रनाम्नींसरस्वतीं । सूर्याचंद्रगतौदेवःससर्जपुरुषोत्तमः । तावावि
श्यस्वयंविष्णुःसर्वसृष्टीःकरोत्यजः । अमूर्तस्थःसवायुस्तुमूर्तसंस्थासरस्वती ।

उप० । यद्दक्षिणांयत्प्रतीचींयदुदीचींयदधोयदूर्ध्वंयदंतरादिशोयत्सर्वंप्रकाशयतितेनसर्वान्प्राणान्रश्मिषुसन्निधत्ते ॥ ५ ॥ सएषवैश्वानरो
(विश्वरूपः) प्राणोग्निरुदयते । तदेतदृचाभ्युक्तं । विश्वरूपंकरिणंजातवेदसंपरायणंज्योतिरेकंतपंतं ।

वैतं । उपलक्षणंचैतत् । शोषणादिकंचकुर्वाणमादित्यमंडलस्थंपुरुषंजानीयात् । किमिति । सहस्ररश्मिरनंततेजाः । शतधानंत रूपैः । सर्वप्राणिषुवर्तमानोयःप्राणएषप्रजानामुत्पत्तयेसूर्येस्थित्वोदयतीति । तदेतदाह ॥ आदित्यस्थइति ॥ प्राणान्प्राच्यादी नात्मनिस्वरश्मिषुसंनयेत् । सन्निवेशयतीत्यर्थः । केतेप्राच्यादयःप्राणाइति । तत्तद्दिग्गतप्राणिप्रणयनादिंद्रादयोदिक्पालाएवे त्याह ॥ प्राच्याःप्राणाइति ॥ तथाशब्दोवक्ष्यमाणदक्षिणादिसमुच्चयार्थः । कथंतेषुबहुवचनमित्यतआह ॥ सभार्याइति ॥ सभार्यैरग्न्यादिभिःकोणपैःसार्धमिंद्रादयइत्यर्थः । यदधइत्यादौनैतत्संबध्यते । सभार्याइत्येव । अतस्तत्रबहुवचनसंपादनाय शे षमित्राविल्यादिद्वयोरुक्तिः । दिङ्मध्यस्थाअपिकेचिज्ज्ञातव्याः । एवंचंद्रमसिस्थितायादेव्याअप्योषधिजननादिद्वारेणप्रजोत्पत्ति निमित्तत्वमुपपादनीयमिति ॥ ६ ॥ अथसर्वोत्पत्तिनिमित्तकारणंसंवत्सरादिलक्षणंकालं तदवांतरभेदोत्तरायणाद्यधिष्ठातारौरयि प्राणौचाधिष्ठाय प्रजापतेःप्रजाकारणत्वमुच्यते ॥संवत्सरइति॥ प्रजापतिःसंवत्सरोवै संवत्सरस्थःसन्प्रजाजनयतीतिप्रसिद्धं । तस्यसंवत्सरस्ययेअयनेसूर्यगतिविशेषोपलक्षितौदेवयानपितृयानलक्षणदेवताविशेषाभिमतौभागविशेषौ नामतोदक्षिणंचोत्तरंच

उप० । सहस्ररश्मिःशतधावर्तमानःप्राणःप्रजानामुदयत्येषसूर्यः ॥ ६ ॥

भा० । आदित्यस्थःसवायुस्तुप्राणानात्मनिसन्नयेत् । प्राच्याःप्राणास्तथेंद्राद्यादक्षिणाश्चयमादयः । प्रतीच्यावरुणाद्यास्तुसोमाद्याउत्तराः स्मृताः । शेषमित्राववाचीनौवींद्रकामावुदक्तनौ । सभार्याःकोणपैःसार्धचत्वारोदिशिदिश्यपि ।

उप० । संवत्सरोवैप्रजापतिः । तस्यायनेदक्षिणंचोत्तरंच ।

तयोरेयिप्राणावधिष्ठातारावितिशेषः। कुतएतदिति । उच्यते॥तद्यइत्यादि॥तत्तत्रसाधकेषुयेऋषयःप्रजाकामामोक्षेतरफलकामाः संतइतियावत्। इष्टंयजनं पूर्तमन्नप्रदानादिकं कृतमन्यच्चकर्मेत्येतदुपासतेऽनुतिष्ठंति। तएतेदक्षिणंपितृयाणंप्रतिपद्यंते। प्रतिपन्नाश्चतेचांद्रमसमेवलोकमभिजयंतेप्राप्नुवंति ।तएवपुनःस्वकर्मावसानेतस्माच्चंद्रलोकादावर्ततेहवै । यतएवंपितृयाणेनगतानांपुनरावृत्तिमच्चंद्रलोकप्राप्तिलक्षणंफलंप्रसिद्धं। तस्माच्चंद्राधिष्ठात्रीरयिरेवैषःयःपितृयाणोवैपितृयाणाधिष्ठात्रीतिगम्यते॥७॥ अथयेमुमुक्षवस्तपआदिसाधनैःपरमात्मानमन्विष्यविचार्यविदित्वाचोत्तरेणगतास्तआदित्यमभिजयंतेततश्चपरमंब्रह्म । यस्मादेतद्वै देवयानेनप्राप्यंपरंब्रह्मैव प्राणानामिंद्रादीनामायतनमाधारःएतदेवामृतमभयंचैतदेवपरायणं मुक्तानामप्याश्रयोऽतएतस्मान्नपुनरावर्तंते । इतितस्मादपुनरावृत्त्ययोग्यानांमार्गनिरोधकत्वादेवैषआदित्यो निरोधोऽविदुषामित्युच्यते श्रुत्यंतरइति । यतएवमुत्तरायणेनगतानामपुनरावृत्त्याऽऽदित्यप्राप्तिलक्षणंफलंप्रसिद्धं तस्मादादित्याधिष्ठिताप्राणएवोत्तरायणाधिष्ठातेतिज्ञायतइतिवाक्यशेषः । आदित्यंप्राप्तानामपुनरावृत्तिरित्यत्रश्रुत्यंतरसंमतिरुक्ता ॥ तदेषइति ॥ यच्चोक्तं केचित्पितृयाणेनयांति केचिद्देवयानेनेति त

उप० । तद्येहवैतदिष्टापूर्तेकृतमित्युपासतेतेचांद्रमसमेवलोकमभिजयंते । तएवपुनरावर्ततेतस्मादेतेऋषयःप्रजाकामादक्षिणंप्रतिपद्यंते । एषवैरयिर्यःपितृयाणः ॥ ७ ॥ अथोत्तरेणतपसाब्रह्मचर्येणश्रद्धयाविद्ययाआत्मानमन्विष्यादित्यमभिजयंते । एतद्वैप्राणानामायतनमेतदमृतमभयमेतत्परायणमेतस्मान्नपुनरावर्ततइत्येषनिरोधः । तदेषश्लोकः ।

त्रैषवक्ष्यमाणःश्लोकोमंत्रः संमतित्वेनभवति। हेमंतशिशिरयोरैक्येनपंचर्तवस्तदभिमानिनःपादाअंशायस्यतंपंचपादं । पितरंप्रजानांपोषकं । द्वादशमासाभिमानिदेवताआकृतयोरूपाणियस्यतं द्वादशाकृतिं । विचक्षणंविवेकिनं । सप्तचक्राणिचंक्रम्यतेरथएभिरितिअश्वायस्यासौसप्तचक्रःतस्मिन् । षट्संख्याकाअरायस्यासौषळरःतस्मिन्नर्थेर्पितंवर्तमानमादित्यं दिवोंतरिक्षस्यपरेऽन्यतरस्मिन्किंचिद्दक्षिणाश्रितेऽर्धेभागेगच्छंतं । पुरीषमुदकंतदस्यास्तीतितंपुरीषिणंवर्षणहेतुं । तदुपलक्षितकालाभिमानिदेवतामार्गमितियावत् । केचित्काम्यकर्मिणःस्वप्राप्यमाहुः । अथ तेभ्योऽन्येइमेज्ञानिनःदिवउ परेपरस्मिन्किंचिदुत्तराश्रितेभागेगच्छंतमादित्यं तदुपलक्षितकालाभिमानिदेवतामार्गंस्वप्राप्यमाहुरितियावत् ॥ ८ ॥ तदेतदाह ॥ संवत्सरस्थइति ॥ किंचमासोवैप्रजापतिः । मासलक्षणंकालमधिष्ठायप्रजाःसृजतीतियावत् । तस्यमासस्यावयवभूतःकृष्णपक्षएवरयिः । शुक्लपक्षःप्राणः । पक्षद्वयेस्थित्वाप्रजापतेःप्रजोत्पत्तौनिमित्तीभवतइतियावत् । कुतएतत् । यस्मात्खल्वादित्योत्तरायणाधिष्ठाताप्राणःशुक्लपक्षेस्थितः तस्मादेवह्येतेउत्तरायणेनादित्यंजिगमिषंतऋषयःशुक्लपक्षेइष्टिंयजनंनिष्कामंप्राणपूजात्मकंकुर्वंति । यस्माच्चंद्रदक्षिणायनाधिष्ठात्री रयिःकृष्णपक्षेस्थिता तस्मादेवहीतरेदक्षिणायनेनचंद्रमसंप्रेप्संतऋषयइतरस्मिन्कृष्णपक्षेकाम्यांरयिंपूजारूपामिष्टिंकुर्वंतीतिया

उप० । पंचपादंपितरंद्वादशाकृतिंदिवआहुःपरेअर्धेपुरीषिणं । अथेमेअन्यउपरेविचक्षणंसप्तचक्रेषळरआहुरर्पितं ॥ ८ ॥

भा० । संवत्सरस्थोभगवान्वागीरावयनस्थितौ ।

वत् । तदेतदाह ॥ **मासस्थितइति** ॥ किंचाहोरात्रेइत्यादिपूर्ववद्व्याख्येयं । तदिदमाह ॥ **अहोरात्रेत्विति** ॥ एकवद्भाव स्यवैकल्पिकत्वेनश्रुतावहोरात्रेइतिप्रथमा । भाष्येतुसप्तमीतिज्ञातव्यं । प्राणंवाइत्यादिवाक्यंनसाक्षात्प्रकृतेनसंबध्यते । अतोम ध्येकिमपिवक्तव्यं तदाह ॥ **दंपत्योरिति** ॥ एवंसतितदुपपादकत्वेनास्यसंबंधः । येदिवारत्यारतिहेतुभूतयास्त्रियासंयुज्यंतेसंयो गमाचरंति तएतेप्राणंस्कंदंतिनिर्गमयंति । यत्रक्कचनपरित्यजंति । यद्रात्रौरत्यासंयुज्यंते तदिदंब्रह्मचर्यसममेवेतितावत्प्रसिद्धं । तेनज्ञायतेरात्र्यधिष्ठात्रीरयिःस्त्रियांवर्तते अहरधिष्ठाताप्राणःपुंसीति । तथाहि । दिवापुरुषरेतसिप्राणस्याधिकंसन्निधानं । नतदा देव्याः । स्त्रियांतावत् । ततश्चदिवापुरुषरेतसिस्थितेप्राणेस्त्रियंप्राप्तेयत्रक्कचासावनेनत्यक्तोभवति । रात्रौतुस्त्रियांदेव्याअधिकं सन्निधानमिति । तदाप्राणःस्वभार्यामेवप्राप्तोवर्ततइत्युपपद्यतइति ॥ ९ ॥ किंचान्नंवैप्रजापतिः । कथमन्नेस्थितस्यप्रजापतेःप्रजा जनकत्वमिति । ततोन्नात्खल्वेतद्रेतोजायते । किंचातः तस्माद्रेतसोहीमामानुषादिप्रजाःप्रजायंतइति । अन्नेस्थित्वातत्रेतोरूपे णपरिणाम्यतदुपादानीकृत्यप्रजापतिःप्रजाःसृजतीतियावत् । एवंपरमेश्वरोनिमित्तोपादानभूतान्पदार्थान्द्वारीकृत्यप्रजाःसृज

भा० । मासस्थितःसभगवान्पक्षयोर्वाक्चमारुतः । अहोरात्रेतुभगवान्प्राणोह्यहनिवाङ्निशि ॥

उप० । मासोवैप्रजापतिः । तस्यकृष्णपक्षएवरयिः । शुक्लःप्राणस्तस्मादेतेऋषयःशुक्लइष्टिंकुर्वंतीतरइतरस्मिन् । अहोरात्रेवैप्रजापतिस्तस्या हरेवप्राणोरात्रिरेवरयिः । प्राणंवाएतेस्कंदंतियेदिवारत्यासंयुज्यंते । ब्रह्मचर्यमेवतद्यद्रात्रौरत्यासंयुज्यंते ॥ ९ ॥ अन्नंवैप्रजापतिस्ततोहवैतद्रेतः तस्मादिमाःप्रजाःप्रजायंतइति ।

तीतिविदुषःफलमुच्यते ॥तदित्यादिना॥ तत्तत्रप्रजासु येखलुपुरुषास्तदेतद्यथोक्तंप्रजापतेर्व्रतंकर्मचरंतिजानंति तेमिथुनमुत्पादयंतेसाध्वपत्याभवंति । तेषामेवैषसत्याख्योब्रह्मलोकःप्राप्योभवति । येषांतपोब्रह्मचर्यंचास्ति येषुसत्यंसत्यवचनंप्रतिष्ठितंनियमेनस्थितं । नकेवलमेतावत् । किंतुयावद्ब्रह्मलयंतत्रस्थितानामेवतेषामसौविरजोप्राकृतोब्रह्मलोकोवैकुंठादिःप्राप्योभवति । येषुजिह्मंकौटिल्यमनृतमसत्यवचनंमायाविप्रलिप्सेत्येवमादिदोषानसंति तेषामितिसंबंधः । सत्यवचनादिगुणाभिधानेनसिद्धस्याप्यनृतादिदोषाभावस्योक्तिरादरार्थेति । तदिदमाह ॥ **एवमिति** ॥ **इतिप्रथमप्रश्नप्रतिवचनं** ॥ १ ॥ **अथहैनंभार्गवः** ॥ प्रश्नार्थस्योक्तानंतर्यसूचकोथशब्दः । उक्तंपरमेश्वरस्यसकलप्रजाजनकत्वं । लब्धजन्मनःस्थित्यादीति तदनंतरंस्थितिज्ञानहेतुत्वंवक्तव्यं । प्राक्प्राणस्यवरिष्ठत्वमभिप्रेतं तच्चोपपादनीयमिति तदर्थमुत्तरोग्रंथः । भगवन्कत्येवकियत्संख्याकाः कतरेचदेवाः प्रजाविधारयंते । कतिकतरेचदेवाएतद्विषयजातंप्रकाशयंते । कान्निमित्तीकृत्यपरमेश्वरःप्रजानांस्थितिंविषयप्रकाशंचकरोतीति

उप० । तद्येहवैतत्प्रजापतिव्रतंचरंति । तेमिथुनमुत्पादयंते । तेषामेवैषब्रह्मलोकोयेषांतपोब्रह्मचर्यंयेषुसत्यंप्रतिष्ठितं ।

भा० । दंपत्योर्भगवान्विष्णुर्भार्यास्थातुसरस्वती । भर्तृस्थःसस्वयंवायुः

उप० । तेषामसौविरजोब्रह्मलोकोनयेषुजिह्ममनृतंनमायाचेति ॥ १० ॥ इतिप्रथमःप्रश्नः ॥ **प्रथमःप्रश्नः** ॥ १ ॥

भा० । एवंजानन्विमुच्यतइतिप्रजापतिसंहितायां ॥ १ ॥ प्र० ॥

उप० । अथहैनंभार्गवोवैदर्भिःपप्रच्छ । भगवन्कत्येवदेवाःप्रजाविधारयंते । कतरएतत्प्रकाशयंते ।

यावत् । एषांधारणप्रकाशहेतूनांदेवानांमध्येकोवावरिष्ठोतिशयेनवरः ॥१॥ पूर्वोक्तरीत्याप्राणेनभाव्यं । तत्कथमित्येवंपृष्टवतेत स्मैसहोवाच।एषआकाश आकाशाभिमानीदेवोहवै यस्त्वयाधारकःपृष्टः।एवंवायुरग्निरित्यादि । अत्रोपलक्षणत्वेनपृथिवीचपृथिवी मात्राचेत्यादिवक्ष्यमाणाःसर्वेपितत्वदेवाग्राह्याः । तेषुचक्षुरादयःप्रकाशहेतवो न्येस्थितिहेतवइतिज्ञातव्यं।उक्तमात्रग्रहणेकःपुनरे षांवरिष्ठइतिप्रश्नाननुगुणःपरिहारःस्यात् । तत्रवायुशब्दस्यप्रधानाप्रधानवायुसाधारण्यादुभयोरपिवक्तव्यत्वात्कोत्राभिप्रेतइतिचिं तायामाह ॥ वायुरिति ॥ भूतप्रकरणत्वादितिभावः । वायाविंद्रइत्यादाविवात्रप्रधानवायुःकिंनस्यात्तस्यापिवक्तव्यत्वादित्यत आह ॥ प्राणशब्देनेति ॥ तान्वरिष्ठःप्राणउवाचेत्युत्तरत्रप्रधानवायुःप्राणशब्देनपरामृश्यते यद्यत्रासौवायुशब्देनप्रकृ(तःस्या) तोनस्यात् । कथंतर्हिप्राणशब्देनपरामृश्येत । नह्येवंबाधकमंतरेणक्वचिदुपलब्धं । लक्षणयापितस्यग्रहणसंभवादिति भावः । नचवाच्यमुभयोरपिवाचकोस्त्विति । उक्तादेवहेतोः । नह्येवंवक्तव्यंसर्वमप्युक्तंस्यात् । येनसकृदुच्चारितस्यशब्दस्यार्थ द्वयंप्रतिपद्येमहीति । एतेषांचप्राणस्यवरिष्ठत्वावधारणायाख्यायिकोच्यते ॥ तेप्राकाश्याइत्यादि ॥ तएतेधारकाःप्रकाशका श्चदेवाःप्राकाश्याःप्रकाशवंतः । अभिअभितःउच्चैरितियावत् । अभिवदंतिकदाचिदन्योन्यंस्पर्धयैवाभ्यवदन् । किमिति । वय

उप० । कःपुनरेषांवरिष्ठइति ॥ १ ॥ तस्मैसहोवाच । आकाशोहवाएषदेवोवायुरग्निरापःपृथिवीवाङ्मनश्चक्षुःश्रोत्रंच ॥

भा० । वायुरग्निरित्यत्रभूतवायुरुच्यते । प्राणशब्देनप्रधानवायुः ॥ २ ॥ प्र० ॥

उप० । तेप्राकाश्याअभिवदंति ।

मेतद्बाणंशरीरमवष्टभ्याश्रित्यविधारयामःप्रकाशयामश्चेति । अहमेवस्वातंत्र्येणदेहधारकोनत्वमितिधारकः । अहमेवस्वातंत्र्येणविषयप्रकाशकोनत्वमितिप्रकाशकइतियावत् ॥२॥ तानेवंमन्यमानान्वरिष्ठःप्राणउवाच । किमिति । वयमेवधारकाःप्रकाशकाश्चेत्येवंविधंमोहंमिथ्याज्ञानंमाप्राप्नुत । कुतोयंमोहः । यस्मादहमेवैतदेतस्मिंञ्छरीरेपंचधाप्राणादिरूपैरात्मानंप्रविभज्यप्रविभक्तंकृत्वैतद्बाणमवष्टभ्यविधारयामिप्रकाशयामिचेति । तच्छ्रुत्वातेऽश्रद्दधानाअप्रत्ययवंतोबभूवुःकुतएतदित्थमिति । समुख्यप्राणस्तेषांप्रत्यायनायाभिमन्यतइत्यभिमानोदेहस्तस्मादूर्ध्वमुत्क्रमतइव किंचिदूर्ध्वमुदक्रामत्।अथतस्मिन्प्राणेउत्क्रामतिसतीतरेसर्वएवआकाशादिदेवाःशरीरधारणादौस्वस्थितौचासमर्थाउत्क्रमंतेउदक्रामन् । अस्ययादृच्छिकत्वपरिहारायपुनस्तस्मिन्प्राणेप्रतिष्ठमानेशरीरएवप्रतितिष्ठति । सर्वएवदेवाःप्रतिष्ठंतेशरीरेप्रतितिष्ठंति ॥ ३ ॥ किमिव । तत्तत्रलोके यथामधुमक्षिकामधुकराःमधुकरराजानंप्रधानमधुमक्षिकां मधुस्थानादुत्क्रामंतीमनु सर्वाएवोत्क्रामंति तस्यांचप्रतिष्ठितायांसर्वाएवतत्रप्रतितिष्ठंतिएवंवागादयोदेवाइति । इत्थमन्वयव्यतिरेकाभ्यांप्राणस्यवरिष्ठत्वेवधारितेप्रीतास्तेदेवाःत्वमेवसर्वदेवादिषुस्थित्वातन्नामातद्गुणक्रियादिप्रवर्तक

उप० । वयमेतद्बाणमवष्टभ्यविधारयामइति ॥ २ ॥ तान्वरिष्ठःप्राणउवाच । मामोहमापद्यथाहमेवैतत्पंचधाऽऽत्मानंप्रविभज्यैतद्बाणमवष्टभ्यविधारयामीति । तेऽश्रद्दधानाबभूवुः सोभिमानादूर्ध्वमुत्क्रमतइवतस्मिन्नुत्क्रामत्यथेतरेसर्वएवोत्क्रमंते । तस्मिंश्चप्रतिष्ठमानेसर्वएवप्रतिष्ठंते ॥ ३ ॥ तद्यथामधुमक्षिकामधुकरराजानमुत्क्रामंतंसर्वाएवोत्क्रमंते । तस्मिंश्चप्रतिष्ठमानेसर्वाएवप्रतिष्ठंते । एवंवाङ्मनश्चक्षुःश्रोत्रंचेति ।

इतिप्राणंस्तुन्वंतिअस्तुवन् । तदुच्यते ॥ एषोग्निरित्यादि ॥ एषप्राणएवाग्निःसंस्तपति । एषएवसूर्योपिसंस्तपति । मघवान
प्येषएवेतिशेषः । पृथिवीरयिश्च य त्सदसन्मूतामूर्तं यच्चामृतंमुक्तजातं तदप्येषएव ॥ ४ ॥ कथमेतत्सर्वंप्राणइति । उक्तंवक्ष्य
माणंचविव्रियते ॥ अराइति ॥ तस्मात्सर्वंप्राणइत्युच्यतइतिशेषः । परोक्षतयास्तुतोऽपरोक्षतयास्तूयते ॥ प्रजापतिरित्या
दिना ॥ प्रजापतिर्दक्षादिस्त्वमेव । गर्भेचगर्भस्थप्रेरकतयात्वमेवचरसि । प्रतिजायसे जनिक्रियांचत्वमेवकरोषि । हेप्राणेमादेवा
द्याःप्रजास्तुभ्यं त्वदीयाः । कुतः । यद्यस्मात्त्वंप्राणैश्चक्षुरादिभिःसहधारणादिकंकुर्वञ्छरीरेप्रतितिष्ठसि तस्मात् । नकेवलंतपनक्रि
यावानग्निःप्राणः किंतूच्यते ॥ देवानामिति ॥ त्वंदेवानांवह्नितमोयज्ञभागवाहकतमोसि । पितॄणांप्रथमास्वधा मुख्यस्वधावा
हकोपित्वमेवासि । त्वमेवाथर्वांगिरसामृषीणांचरितमाचारःसत्यवचनंचासि ॥ ५ ॥ इंद्रस्त्वमितिमघवानित्युक्तविवरणं । तेज
सा युक्तइतिशेषः । वायुरित्यस्यविवरणंत्वमंतरिक्षइति । नकेवलंसूर्यस्यतापकत्वंप्राणाधीनं । किंतुज्योतिषांग्रहाणांपतित्वंच ।
पर्जन्यत्वविवरणं ॥यदेति॥ हेप्राणयदात्वंपर्जन्यरूपोभिवर्षसि । अथ तदा । ते त्वदीया । इमा मानुषादिप्रजाः । कामायय

उप० । तेप्रीताःप्राणंस्तुन्वंत्येषोग्निस्तपत्येषसूर्यएषपर्जन्योमघवानेषवायुरेषपृथिवीरयिर्देवःसदसच्चामृतंचयत् ॥ ४ ॥ अराइवरथनाभौ
प्राणेसर्वंप्रतिष्ठितं । ऋचोयजूंषिसामानियज्ञःक्षत्रंचब्रह्मच । प्रजापतिश्चरसिगर्भेत्वमेवप्रतिजायसे । तुभ्यंप्राणप्रजास्त्विमायत्प्राणैःप्रतितिष्ठसि ।
देवानामसिवह्नितमःपितॄणांप्रथमस्वधा । ऋषीणांचरितंसत्यमथर्वांगिरसामसि ॥ ५ ॥ इंद्रस्त्वंप्राणतेजसारुद्रोसिपरिरक्षिता । त्वमंतरिक्षेचर
सिसूर्यस्त्वंज्योतिषांपतिः । यदात्वमभिवर्षस्यथेमाःप्राणतेप्रजाः ।

थेष्टमन्नंभविष्यतीतिनिश्चित्यानंदरूपाआनंदवत्यस्तिष्ठंति । हेप्राण त्वंव्रात्योव्रतनिष्ठ एकर्षिरथर्ववेदद्रष्टासि । विश्वस्यात्तासंहर्ता यमादिश्चत्वमसि । सतांपतिःसंश्चासौपतिश्चेतिवासत्पतिस्त्वमसि । वयंतवाद्यस्यभोज्यस्य दातारस्त्वत्पूजकाइतियावत् । कुतःहे मातरिश्व मातरिश्वन् । त्वंनोऽस्माकंपितासि । मातरिश्वनो भूतवायोःपितेतिवा ॥ ६ ॥ एवंस्तुत्वाप्रकृतंतूच्यते ॥ यातइत्यादि ॥ यातेत्वदीयातनूःमूर्तिर्वाचिप्रतिष्ठिता । याश्रोत्रेयाचचक्षुषियाचमनसिसंततासम्यग्व्याप्यवर्तमानाएवमन्येष्वपितत्वेषुया प्रतिष्ठितातांशिवांशांतांकुरु । मोत्क्रमीः वागादिभ्यस्तथोत्क्रमणंमाकार्षीः । वागादिषुप्राणस्यप्रतिष्ठितत्वंकुतः । यतएतत्सर्ववागादिकंप्राणस्यतववशेवर्तते । नत्वांविनाप्रवर्तितुंक्षमं । नकेवलमध्यात्मंकिंतुत्रिदिवेस्वर्गेयत्प्रतिष्ठितं अधिदैवादिकंचेतियावत् । वागादिषुस्थित्वाचत्वमस्मान्मातापुत्रानिवरक्षस्वपालय । श्रीःश्रियंप्रजाधारणशोभामितियावत् । प्रज्ञांप्रज्ञानंप्रकाशकत्वशक्तिंच नोअस्माकंविधेहिकुर्वितिस्तुन्वंतीतिसंबंधः ॥ ७ ॥ इतिद्वितीयप्रश्नप्रतिवचनं ॥ २ ॥ अथहैनंकौसल्यः ॥ प्रागुक्तंपरमेश्वरोनिखिलजगज्जन्मादिकर्तेत्यादि तद्विवरणार्थोयमुत्तरोग्रंथः । भगवन्कुतः कस्मात्पुरुषा देषउक्तलक्षणः प्राणोजायते । स

उप० । आनंदरूपास्तिष्ठंतिकामायान्नंभविष्यतीति । व्रात्यस्त्वंप्राणैकर्षिरत्ताविश्वस्यसत्पतिः । वयमद्यस्यदातारःपितात्वंमातरिश्वनः॥६॥ यातेतनूर्वाचिप्रतिष्ठितायाश्रोत्रेयाचचक्षुषि । यामनसिसंतताशिवांतांकुरुमोत्क्रमीः । प्राणस्येदंवशेसर्वंत्रिदिवेयत्प्रतिष्ठितं । मातेवपुत्रान्रक्षस्वश्रीश्चप्रज्ञांचविधेहिनइति ॥ ७ ॥ **द्वितीयःप्रश्नः** ॥ २ ॥ अथहैनंकौसल्यश्चाश्वलायनःपप्रच्छ । भगवन्कुतएषप्राणोजायते ।

मिथुनमुत्पादयते रयिंचप्राणंचेत्युक्तमपिपरमेश्वराज्जन्म एवमाढ्यस्यकथंनामसंभवतीत्यभिप्रायः। अहमेवैतत्पंचधाऽऽत्मानंप्रविभज्यैतद्बाणमवष्टभ्यविधारयामीत्युक्तं तत्रकथंकस्मात्कारणात् अस्मिंच्छरीरेप्राणआयातिप्रवर्तते । आत्मानंप्रविभज्यचकथंप्रतिष्ठते प्रतितिष्ठति । केतेविभागा स्तैश्चकिंकुर्वन्कुत्रस्थानविशेषेतिष्ठतीतियावत् । तस्मिन्नुत्क्रांते सर्वेप्युत्क्रांताइत्युक्तं । तत्रकेनप्रविभागेनजीवादीनादायोत्क्रामति । प्राणस्यैतद्वशेसर्वंत्रिदिवेयत्प्रतिष्ठितमित्युक्तं । तत्रकथंकेनरूपेणबाह्यमधिभूतादिकमभिधत्ते धारयति । कथंचाध्यात्ममभिधत्ते ॥ १ ॥ इत्येवंपृष्टवतेतस्मैसहोवाच । यस्मादेवंत्वमतिप्रश्नानतिशयितान्प्रष्टव्यार्थान्पृच्छसि तस्मात्त्वं ब्रह्मिष्ठो वेदविचारादिमानसि । नह्यन्यथैवंविधाःप्रश्नाःसंभवंतीति । यस्माद्ब्रह्मिष्ठोसि तस्मादहंतेतुभ्यमुत्तरंब्रवीमीतितंप्रशस्याद्यप्रश्नोत्तरमुच्यते ॥ आत्मतइति ॥ एष एवंमहामाहात्म्योपिप्राणः आत्मतोजायते । तत्कथं । यथाखल्वेषाच्छाया पुरुषेशरीरे । आतता अत्यंतंशरीराधीनावर्तते । एवमेतस्मिन्नात्मन्येतत्सर्वंप्राणादिकमाततं । प्राणादप्याढ्यतमत्वादात्मनस्ततःप्राणस्यजन्मसंभवत्येवेत्यभिप्रायः । आत्मशब्दस्यानेकार्थकत्वात्कोत्राभिप्रेतइतिनज्ञायते । तस्मादाह ॥ आत्मतइति ॥ नह्यन्यस्यप्राणजनकत्वादिकंसंभवतीतिभावः । द्वितीयप्रश्नस्योत्तरं ॥मनइति ॥ सचायंप्राणोमनोकृतेनमनःकृतेनमनःपरंब्रह्म

उप० । कथमायात्यस्मिंच्छरीरे । आत्मानंवाप्रविभज्यकथंप्रतिष्ठते । केनोत्क्रमते कथंबाह्यमभिधत्तेकथमध्यात्ममिति ॥ १ ॥ तस्मैसहोवाच । अतिप्रश्नान्पृच्छसिब्रह्मिष्ठोसीति । तस्मात्तेहंब्रवीमि । आत्मतएषप्राणोजायते । यथैषापुरुषेच्छायाएतस्मिन्नेतदाततं ॥ २ ॥ मनोकृतेनायात्यस्मिंच्छरीरे ।

तत्कृतेनतन्निमित्तेनतत्प्रेरणयेतियावत् । आत्मनःप्रकृतस्य । मनोनिमित्तेनेच्छयेतिवा आयात्यस्मिंच्छरीरइति । आत्मानंवेत्यादिप्रश्नोत्तररूपे यथासम्राडित्यादिवाक्ये प्राणादिपंचकस्यमुख्यप्राणनियोज्यत्वं ततोभिन्नत्वलिंगंप्रतीयते । पुण्येनपुण्यंलोकंनयतीत्यादिमोक्षदातृत्वादिलिंगेनतेनाभेदोपि । तस्यतन्नियोज्येष्वसंभवात् । अतोव्यामिश्रमिवप्रतीयमानंवाक्यं समंजसीकर्तुमात्मतएषप्राणोजायतइतिवाक्यार्थसहितैतद्वाक्यार्थेसमाख्यास्मृतिमेवपठति ॥ विष्णोरिति ॥ ततश्चैवंयोजनीयं । यत्पृष्टंत्वयाऽऽत्मानंवाप्रविभज्येति तत्रास्तिविवेक्तव्यं । द्विविधंतावत्प्राणादिपंचकं एकंमुख्यप्राणाज्जातं ततोतिरिक्तं अपरंतदात्मकमिति। तत्रयथालोकेसम्राट्सार्वभौमोधिकृतान्नियोगिनोविनियुंक्ते । कथं त्वमेतान्पाटलिपुत्रादीन्ग्रामानधितिष्ठस्व तदाधिपत्येनतिष्ठेत्येकं । अन्यच्च त्वमेतान्कौशांबीप्रभृतीन्ग्रामानधितिष्ठस्वेति । एवमेवैषमुख्यप्राण इतरान्भिन्ना नात्मनोजातत्वादुपचारेणात्मप्रविभागान्प्राणान्वायून्पृथक्पृथगेवस्थानेषुसन्निधत्तेस्थापयति। स्वयंच तत्तत्क्रियाप्रवर्तकतया तत्र प्राणादिपंचरूपोऽवतिष्ठत इत्याशयः ॥ ३ ॥ पृथक्पृथगित्युक्तंविव्रियते ॥ पायूपस्थइत्यादि ॥ पायुश्चोपस्थश्चपायूपस्थं । तत्रमलादेरपनयनादपानंवायु

भा० । आत्मतःपरमात्मतः । विष्णोर्वायुःसमुत्पन्नोवायोःसर्वाश्चदेवताः । प्राणाद्यास्तान्नयन्प्राणआज्ञापयतिराजवत् । स्वयंचपंचरूपः सन्दद्यान्मोक्षादिकंप्रभुरितिप्रभंजने ॥ ३ ॥

उप० । यथासम्राडेवाधिकृतान्विनियुंक्तएतान्ग्रामानधितिष्ठस्वैतान्ग्रामानधितिष्ठस्वेत्येवमेवैषप्राणइतरान्प्राणान्पृथक्पृथगेवसन्निधत्ते ॥ ३ ॥ पायूपस्थेऽपानं

मात्मनोरूपेणापानेनाधिष्ठितंसन्निधत्तइतिसंबंधः । चक्षुश्चश्रोत्रंचचक्षुःश्रोत्रं तस्मिन्मुखनासिकाभ्यांसहमुखेनासिकायांचेतियावत् । प्राणःस्वयं मुख्यएव श्वासादिप्रणयनात्प्राणनाम्नारूपेण प्राणवायुमधिष्ठायप्रतितिष्ठति । समानस्तु समाननामानंवायुमधिष्ठाय मध्ये प्राणापानयोर्नाभिदेशइतियावत् । प्रतितिष्ठति ॥ सचैषयस्मादेतद्धुतंभुक्तमन्नंसमं यथाशरीरावयवं नयति ते नसमाननामेतिशेषः । किंतेन । तस्मादन्नस्यसमीकरणादेताः सप्तार्चिषः सप्तज्ञानेंद्रियवृत्तयोभवंति । नन्वात्मैवविषयसंसर्गेणताननुभविष्यतिकिमिंद्रियवृत्तिभिरिति । मैवं । हृदिह्येषआत्माजीवःस्वरूपेणवर्ततेऽतःकथंतस्याणोर्विषयसंगतिःस्यादिति ॥४॥ व्यानस्यप्रवृत्तिंवक्तुमुच्यते ॥ अत्रेत्यादि ॥ अत्र शरीरे । यदेतदेकशतमेकोत्तरंशतं नाडीनांशिराणां भवति । तासांनाडीनां मध्येएकैकस्यांनाड्यांशतंशतंप्रतिशाखानाड्योभवंति । पुनस्तासांचप्रतिशाखानाड्योभवंतीतिवक्तव्यं । एवंचसंभूय प्रतिशरीरं तासांप्रतिशाखानाडीनां सहस्राणिद्वासप्ततिं जानीयात् । प्रतिशाखानाडीसहस्राणांद्वासप्ततिमितिद्वितीयाषष्ठ्यर्थेयोजनीया । किंचातः । आसुनाडीषु विविधंनयनात्व्यानो व्यानवायुमधिष्ठायचरति । अथोदानस्तूदानवायुमधिष्ठायैकयानाड्या सुषुम्नयोर्ध्वगतिश्चरति । सचतत्रचरन्पुण्येन जीवकृतंपुण्यंनिमित्तीकृत्य । पुण्यं स्वर्गादिलोकं नयति । एवंज्ञानेनमोक्षमितिचद्रष्ट

उप० । चक्षुःश्रोत्रेमुखनासिकाभ्यांप्राणःस्वयंप्रतिष्ठते । मध्येतुसमानः । एषह्येतद्धुतमन्नंसमंनयतितस्मादेताःसप्तार्चिषोभवंति । हृदिह्येषआत्मा ॥ ४ ॥ अत्रैतदेकशतंनाडीनांतासांशतमेकैकस्यांद्वासप्ततिंद्वासप्ततिंप्रतिशाखानाडीसहस्राणिभवंत्यासुव्यानश्चरत्यथैकयोर्ध्वउदानः । पुण्येनपुण्यंलोकंनयति

व्यं । अतएवोर्ध्वंनयनादुदानः। पापेनपापंनरकादिकंदुःखबहुलंलोकंनयति उभाभ्यां समप्रधानाभ्यांपुण्यपापाभ्यां समदुःखसुखंमनुष्यलोकं नयतीति ॥ ५ ॥ कथंबाह्यमित्यादिप्रश्नद्वयंपरिह्रियते ॥ आदित्यइत्यादि ॥ मुख्यप्राणएवहिप्राणनामा बाह्यो बहिर्भव आदित्यआदित्येस्थितः । तन्नामदधत् उदेतिउद्गच्छति । एषआदित्यस्थप्राणएवैनंचाक्षुषंचक्षुषिभवंप्राणवायुमनुगृह्णानोवर्तते । एतेनमुख्यप्राणःप्राणनाम्नारूपेणबहिरादित्यमभिधत्ते।अध्यात्मंचा(दित्यस्थःप्राणः)धिष्ठानभूतेनादित्येनसहैव चक्षुषिस्थित्वाचक्षुस्तदभिमानिनंचप्राणवायुमित्युक्तंभवति । एवमुत्तरत्रापिज्ञातव्यं । बहिःपृथिव्यांयाधारिकापानाख्यादेवतासैषा पुरुषस्यापानं देहेवर्तमानमपानवायुमवष्टभ्यधृत्वांतरा शरीरांतर्वर्तते।अंतरा द्यावापृथिव्योर्मध्ये। यदाकाशो यआकाशः। आकाशधारकःसमानः सोध्यात्मंसमानवायुंधत्ते।योबहिर्वायुधारकोव्यानः सएवांतर्व्यानोव्यानवायुधारकः।बहिस्तेजोधारकोयउदानः सउदानःउदानवायुंधत्तइत्येतत्प्रसिद्धं । कथमिति । यस्मात्तेजोधिष्ठातोदानःतेनाधिष्ठानेनतेजसासहैवांतरुदानंदधत्प्राणिनांजीवनहेतुर्वर्तते । तस्मादेवहियःपुरुषःउपशांततेजाभवति । सतेजसोऽपगमनेनोदानस्याप्यगमनमनुमाय मनसिसंपद्यमानैरिंद्रियैः सह पुनर्भवंजन्मांतरं मरणमितियावत् । प्राप्स्यतीत्यनुमीयतेलोकैःइति ॥ ६ ॥ संगतिविशेषलाभात्केनोत्क्रमतइतिप्रश्नस्योत्तर

उप० । पापेनपापमुभाभ्यामेवमनुष्यलोकं ॥ ५ ॥ आदित्योहवैबाह्यःप्राणउदयत्येषह्येनंचाक्षुषंप्राणमनुगृह्णानः । पृथिव्यांयादेवतासैषापुरुषस्यापानमवष्टभ्यांतरायदाकाशःससमानोवायुर्व्यानस्तेजोहवाउदानः । तस्मादुपशांततेजाःपुनर्भवमिंद्रियैर्मनसिसंपद्यमानैः ॥ ६ ॥

मिदानीमुच्यते॥ यच्चित्तइति ॥ एषपुरुषोयच्चित्तोमरणकाले यद्विषयचित्तोभवति तेनतद्विषयेणचित्तेनसहप्राणंमुख्यमायाति तत्समीपंप्राप्नोति । प्राणस्तुतेजसोदानेनयुक्तः परमात्मनासह जीवंयथासंकल्पितं । तेनजीवेनमरणकालेयादृशःसंकल्पितःस्मृतःतथाविधंलोकंशरीरंनयतिप्रापयतीति । अतएवयच्चित्तइत्युक्तं । स्वाभिप्रेतमितिवा । अनेनोदानरूपेणोत्क्रमणमित्युक्तंभवति। एवंभूतप्राणविज्ञानस्यफलमुच्यते ॥ यएवमिति ॥ योविद्वानेवमुक्तलक्षणंप्राणंवेदविजानाति नास्यविदुषःप्रजाहीयते । अविच्छिन्नसंतानोभवतीत्यैहिकं परत्रचामृतोमुक्तोभवति ॥ तदेषश्लोकः ॥ प्राणस्योत्पत्तिंपरमात्मनःआयतिंप्रवर्तनं शरीरेतदिच्छयास्थानमवस्थानं । पायूपस्थादिपंचधाप्राणादिरूपेण विभुत्वं विविधभवनंस्वाम्यंवा । तथाअध्यात्मं अध्यात्मधारकत्वं चशब्देनबाह्यधारकत्वमुत्क्रमणंचेत्येतद्विज्ञायविशेषेणज्ञात्वाऽमृतंमोक्षमश्नुतेप्राप्नोति ॥ ७ ॥ इतितृतीयप्रश्नप्रतिवचनं ॥ ७ ॥ ७ ॥ अथहैनंसौर्यायणी ॥ उक्तंप्राणादेरखिलस्यापिजगतोभगवदधीनत्वं तन्नकेवलंजाग्रदवस्थायां किन्नाम स्वप्नसुषुप्त्योरपीतिदर्शयितुमुत्तरोग्रंथः । भगवन्नेतस्मिन्पुरुषेशरीरिणिस्वपतिसतिकानिदेवानिस्वपंतिस्वव्यापारादुपरमंते । भाव्यंहिकेषांचिद्व्यापारोपरमेण। अन्यथास्वापस्यैवासंभवात् कानिदेवान्यस्मिन्पुरुषेस्वपतिजाग्रतिस्वव्यापारंकुर्वंति । सर्वेषामु

उप० । यच्चित्तस्तेनैषप्राणमायाति । प्राणस्तेजसायुक्तःसहात्मनायथासंकल्पितंलोकंनयति । यएवंविद्वान्प्राणंवेदनहास्यप्रजाहीयतेऽमृतो भवति । तदेषश्लोकः । उत्पत्तिमायतिंस्थानंविभुत्वंचैवपंचधा । अध्यात्मंचैवप्राणस्यविज्ञायामृतमश्नुतेविज्ञायामृतमश्नुतइति ॥ ७ ॥ तृतीयः प्रश्नः ॥ ३ ॥ अथहैनंसौर्यायणीगार्ग्यःपप्रच्छ । भगवन्नेतस्मिन्पुरुषेकानिस्वपंति । कान्यस्मिन्जाग्रति ।

परमेशरीरावस्थानासंभवात् ।स्वापोपिद्विविधः। स्वप्नसुषुप्तिभेदात् ।तत्रस्वप्नेयएषदेवःस्वप्नान्स्वप्नस्थान्पदार्थान्पश्यतिसकतरः । सर्वैंद्रियाणामुपरतत्वात्केनेंद्रियदेवेनजीवःस्वाप्नान्पदार्थाननुभवतीत्यभिप्रायः। सुषुप्तौचयत्सुखंभवति तत्कस्य । तदोपरतकरणस्यजीवस्यविषयसंसर्गाद्यभावेनकथंसुखानुभवोघटतइत्याशयः । एतेच स्वपंतोजाग्रतःस्वप्नाद्यवस्थावांश्चनतावत्स्वतंत्राः । बहूनां तदयोगात् । नचजीवाधीनाःक्वचिदतद्वशत्वस्यापिदर्शनात् । नचमुख्यप्राणाधीनाः । तस्यापिजीवत्वेनानवस्थितेरसंभवाच्च । अतःपराधीनाएतेसर्वेकस्मिन्संप्रतिष्ठिताभवंति । परमेश्वरश्चेत्तदाश्रयःतत्कुतइत्यभिप्रायः ॥ १ ॥ एवंपृष्टवतेतस्मैसहोवाच ॥ यथेत्यादि ॥ अत्रार्कमरीचीनांयत्तेजोमंडलेऽस्तमयेएकीभावकथनं यच्चोदयेतस्मात्पुनःप्रचारवचनं तदनुपपन्नं । अत्रास्तमयेपिदेशांतरेपृथग्दर्शनादिनाऽऽदित्यरश्मीनामुदयास्तमययोरविशेषात् । इंद्रियादिदेवानांचात्रस्वापेवक्तव्ये मनस्येकीभावकथनं कुत्रसंगच्छतेकथंवायुज्यते । नहिभिन्नयोरभेदःक्वचिद्दृष्टः । कथंचमनसःपरदेवत्वमिति । अतएतद्वाक्यंसमंजसयितुं व्याख्यानरूपांस्मृतिमुदाहरति ॥ रश्मीनामिति ॥ सुप्तिगस्यदेवानामिति ॥ तत्तदिंद्रियाद्यभिमानिदेवानामित्यर्थः । सुप्तिगस्यत

उप० । कतरएषदेवःस्वप्नान्पश्यति । कस्यैतत्सुखंभवति कस्मिन्सर्वेसंप्रतिष्ठिताभवंतीति ॥ १ ॥ तस्मैसहोवाच ।

भा० । रश्मीनामविशेषेपिह्यन्यदृष्टिव्यपेक्षया । सूर्यस्यमंडलंयांतीत्युच्यंतेतददर्शनात् ।एवंविष्णोस्तुसामीप्याद्देवानांसुप्तिगस्यतु । व्यवहाराकरत्वाच्चैकीभावइतीर्यतइतिच ।

देवानांचेतिवा । ततश्चायमर्थः । हेगार्ग्य यथार्कस्यास्तमदर्शनंगच्छतःसतः सर्वाएवमरीचयःसर्वेपिरश्मयः एतस्मिन्दृश्यमाने तेजोरूपमंडलेएकीभवंति । तत्रैकीभूताइवदृश्यंते । प्रकाशनादिव्यापारादुपरमंतइतियावत् । ताःपुनस्तेतुरश्मयोर्कस्य पुनरुदयतःसतःप्रचरंति । तस्मान्मंडलान्निर्गत्यलोकेप्रचरंतीवदृश्यंते । स्वव्यापारंकुर्वंतीतियावत् । एवंखल्वेतत्सर्वंशरीरीतादिंद्रियदेवताजातंच परेदेवेविष्णौस्वप्नावस्थायांमनसिस्थिते सुषुप्तौतुहृदयाकाशस्थेएकीभवति । जागरेतुप्रचरति । अनेनस्वप्नेमनोव्यतिरिक्तानामेवोपरमः । सुषुप्तौतुतस्यापीतिसूचितं । यतएवं तेनकारणेन तर्हितदास्वापे एषपुरुषोजीवो नश्रृणोतीत्यादि नेयायते नगच्छति । स्वप्नविवक्षयाचैतत् । सुषुप्तौतुनमनुतइत्याद्यपिद्रष्टव्यं । यतएवंजीवःस्वापेपरंदेवंप्राप्नोति । अतएवहितदास्वपितीत्याचक्षतेविद्वांसः । स्वंस्वतंत्रंदेवमप्येतीतिकृत्वेति ॥ २ ॥ कानिजाग्रतीत्यस्योत्तरं ॥ प्राणाग्नयइति ॥ स्वापकालेएतस्मिन्पुरेशरीरेप्राणाःप्राणादिमुख्यप्राणरूपाण्येवाग्नयः प्राणाग्नयएवजाग्रतिशरीरधारणादिस्वव्यापारंकुर्वंति । अग्नयइत्युपलक्षणं ऋत्विग्भावस्यापिवक्ष्यमाणत्वात्कथंतेषामग्न्यादित्वमिति । उच्यते ॥ गार्हपत्यइत्यादि ॥ तेषांप्राणानामेषोपानोगार्हपत्यःपश्चिमत्वसाम्यात् । व्यानोन्वाहार्यपचनोदक्षिणाग्निः होमांगत्वसाम्यात् । यस्माद्गार्हपत्यादाहवनीयःप्रणीयते । प्राणोप्यपानात् ।

उप० । यथागार्ग्यमरीचयोऽर्कस्यास्तंगच्छतःसर्वाएतस्मिंस्तेजोमंडलएकीभवंतिताःपुनरुदयतःप्रचरंत्येवंहवैतत्सर्वंपरेदेवेमनस्येकीभवति । तेनतर्ह्येषपुरुषोनशृणोतिनपश्यतिनजिघ्रतिनरसयतेनस्पृशतेनाभिवदतेनादत्तेनानंदयतेनविसृजतेनेयायतेस्वपितीत्याचक्षते ॥ २ ॥ प्राणाग्नयएवैतस्मिन्पुरेजाग्रति । गार्हपत्योहवाएषोऽपानोव्यानोन्वाहार्यपचनोयद्गार्हपत्यात्प्रणीयते ।

तस्मात्प्रणयनात्प्रणयनसाम्यात्प्राणआहवनीयः । यद्यस्मात्द्वावेतौउच्छ्वासनिश्वासौ तेएवाहुती समंयथाकालंनयति । तस्मादाहुत्योःसमंनयनसाम्यात्समानःसोध्वर्युरितियावत् । तत्रमननान्मनोजीवोयजमानः । पराधीनफलप्राप्तिसाम्यादित्युत्तरार्थवचनं । उदानइष्टफलं यज्ञफलप्रतिपादकउद्गातेतियावत्।फलप्रतिपादकत्वसाम्यात् कथमुदानस्यफलप्रतिपादकत्वंसउदानोह्येनंयजमानंजीवमहरहःप्रतिदिनं सुप्तावितियावत् । ब्रह्मसुषुम्नागतं गमयतिप्रापयतीति । यएवंवेद तेनैवमिष्टंभवति । नित्यंब्रह्मप्राप्तिफलंचतस्यभवतीतिज्ञापनायेदमुक्तं । यतएवंमनोव्यतिरिक्तानामेवोपरमःस्वप्ने तस्माज्जीवस्यमनसास्वप्नदर्शनंयुक्तमिति ॥३॥ तृतीयस्यपरिहारउच्यते ॥ अत्रेत्यादि ॥ अत्रैतस्यामवस्थायांमनोव्यतिरिक्तेंद्रियोपरमेइतियावत् एषदेवोमनोनामा तेनानुगृहीतोजीवइतियावत् । स्वप्नेमहिमानमात्मनोमहत्त्वमन्यच्चानुभवति तत्रचयमर्थंपश्यतितंप्राग्दृष्टमेवानुपश्यति यःप्राक्श्रुतस्तंश्रुतमेवार्थशब्दंस्वप्नेनुश्रृणोति एवमन्यदप्यनुभूतमेवानुभवति नाननुभूतं किमस्मिन्नेवदेशेऽनुभूतमेवानुभवति न किंतुदेशांतरेदिगंतरेचयत्प्रत्यनुभूतंपुनःपुनरनुभूतंतदेवस्वप्नेपुनःपुनःप्रत्यनुभवति । भ्रांत्यातदेवेदमितिप्रत्यभिजानाति । नाप्यस्मिन्नेवजन्मन्यनुभूतमनुभवतीतिनियमः किंत्वस्मिन्जन्मनिदृष्टमदृष्टंचजन्मांतरेदृष्टं एवमुत्तरत्रापि । अनुभूतंअननुभूतमिंद्रियांतरेण ।

उप० । प्रणयनादाहवनीयःप्राणः । यदुच्छ्वासनिःश्वासावेतावाहुतीसमंनयतिससमानोमनोहवावयजमानःइष्टफलमेवोदानः । सएनंयजमानमहरहर्ब्रह्मगमयति ॥ ३ ॥ अत्रैषदेवःस्वप्नेमहिमानमनुभवति । यदृष्टंदृष्टमनुपश्यतिश्रुतंश्रुतमेवार्थमनुश्रृणोति देशदिगंतरेचप्रत्यनुभूतंपुनःपुनःप्रत्यनुभवति । दृष्टंचादृष्टंचश्रुतंचाश्रुतंचानुभूतंचाननुभूतंच

सच्चतदानीमसच्चनिवृत्तंचेत्येवंसर्वंपश्यति । स्वयंचसर्वोनेकप्रकारःसंस्तत्पश्यति ॥ चतुर्थंपरिहर्तुमुच्यते ॥ सयदेत्यादि ॥ एवं स्वप्नेवर्तमानःसजीवोयदातेजसाभगवदीयेनाभिभूतःआवृतोभवति । भगवंतंप्रविशतीतियावत् । अत्रैतस्यांसुषुप्तिसंज्ञायामवस्थायामेषदेवोमनःस्वप्नान्नपश्यति । मनसोप्युपरतत्वान्नजीवःस्वप्नान्पश्यतीतियावत् । यस्मादेवंपरमेश्वरतेजसाभिभूतोभवत्यथतस्मात्तत्सन्निधानसामर्थ्योद्भूतंयत्सुखंतदस्मिंच्छरीरेभवतीतिनकाचिदनुपपत्तिरिति ॥ ४ ॥ अत्रशरीरशब्देनप्रसिद्धंशरीरमेवोच्यतइत्यन्यथाप्रतीतिनिरासायाह ॥ भगवतइति ॥ प्रातीतिकएवार्थःकिंनस्यादित्यतआह ॥ कस्येति ॥ कस्यैतत्सुखंभवतीतिप्रश्नस्यहीदमुत्तरं । नतुकुत्रजीवस्यसुखंभवतीतिप्रश्नोस्ति । येनशरीरेप्रसिद्धेसुखंभवतीतिपरिहारःसंगतःस्यात् । अतःशरीरशब्देनपरेणापिजीवोलक्षणीयः । ततोवरंशरीरशब्दस्तद्वाचकइत्यंगीकरणमितिभावः । ननुप्रसिद्धशरीरस्यैवसुखंभवतु । ततोलक्षणाश्रयणमंतरेणैवप्रश्नानुगुण्यंपरिहारस्यभविष्यतीत्यतआह ॥ नहीति ॥ ननुभवतापिशरीरशब्दस्यजीवेगौणीवृत्तिराश्रीयते । यथाभगवच्छरीरंभगवत्सदृशं । एवंजीवोपीतिभगवच्छरीरमुच्यतइत्युक्तत्वात् मयापिशरीरशब्देनशरीरीलक्ष्यतइत्युच्यते । अतःकोविशेषइत्यतआह ॥ यस्येति ॥ नजीवेशरीरशब्दोगौणोंगीक्रियते । येनाविशेषतःस्यात् । किंनामअबाधितश्रौतप्र

उप० । सच्चासच्चसर्वंपश्यतिसर्वःपश्यति । सयदातेजसाभिभूतोभवत्यत्रैषदेवःस्वप्नान्नपश्यति । अथयदेतस्मिंच्छरीरेसुखंभवति ॥ ४ ॥

भा० । भगवतःशरीरवत्सादृश्ययुक्तेजीवेसुखंभवति । कस्यैतत्सुखंभवतीतिपृष्टत्वात् । नह्यचेतनस्यशरीरस्यसुखंभवति । यस्मात्माशरीरमितिचश्रुतिः ।

योगबलात्तद्वाचकएवाभ्युपगम्यते । तथापिजीवादिप्रसिद्धशब्दंपरित्यज्याप्रसिद्धशरीरशब्दोपादाने किंतात्पर्यमितिशंकानिरासायभगवतःशरीरवत्सादृश्ययुक्तेजीवइतितात्पर्यमनेनोक्तं । तथाहि । सुप्तौसर्वेंद्रियाणामुपरतत्वात् किंनिमित्तंसुखं केनजीवोनुभवतीत्यभिप्रायेणपृष्टे परमेश्वरसन्निधानसामर्थ्योद्भूतंसुखमात्मस्वरूपज्ञानेनानुभवतीतिपरिहारोभिप्रेतः । तत्रात्मनोज्ञानस्वरूपत्वज्ञापनाय प्रसिद्धपदपरित्यागेन एतत्पदप्रयोगइतिभावः । स्मृतिसमाख्यानाच्चायमेवार्थइत्याह ॥ सादृश्यादिति ॥ सादृश्यंचज्ञानस्वरूपत्वं । अंतिमप्रश्नपरिहारःसदृष्टांतउच्यते ॥ सयथेत्यादि ॥ सोम्यसोमार्ह सःदृष्टांतः । यथावयांसिपक्षिणोवासोयत्रात्मनां तंवृक्षंसंप्रतिष्ठंते अभिगच्छंति । तमाश्रित्यतिष्ठंतिच । एवंखल्वेतत्सर्वंपृथिव्यादितत्वजातंपरेआत्मनिविष्णौसंप्रतिष्ठते । तदाधारमेववर्ततइति । अत्रपृथिवीत्यादिनापंचमहाभूतान्युच्यंते पृथिवीमात्राचेत्यादिनागंधादिपंचतन्मात्राः चक्षुश्चेत्यादिनादशेंद्रियाणि द्रष्टव्यंचेत्यादिनारूपादितद्विषयाः मनइत्यादिनांतःकरणपंचकं मंतव्यंचेत्यादिनातद्विषयाः तेजःशब्देनचेत

भा० । सादृश्यादेहवज्जीवोविष्णोस्तस्यसुखंभवेत् । सुप्तौतस्यसुखार्थंहिभगवान्सुप्तिमानयेदितिच ॥ ४ ॥ प्र० ॥

उप० । सयथासोम्यवयांसिवासोवृक्षंसंप्रतिष्ठंते । एवंहवैतत्सर्वंपरेआत्मनिसंप्रतिष्ठते । पृथिवीचपृथिवीमात्राचापश्चापोमात्राचतेजश्चतेजोमात्राचवायुश्चवायुमात्राचाकाशश्चाकाशमात्राचचक्षुश्चद्रष्टव्यंचश्रोत्रंचश्रोतव्यंचघ्राणंचघ्रातव्यंचरसनंचरसयितव्यंचत्वक्चस्पर्शयितव्यंचवाक्चवक्तव्यंचहस्तौचादातव्यंचपादौचगंतव्यंचपायुश्चविसर्जयितव्यंचोपस्थश्चानंदयितव्यंचमनश्चमंतव्यंचबुद्धिश्चबोद्धव्यंचाहंकारश्चाहंकर्तव्यंचचित्तंचचेतयितव्यंचतेजश्चविद्योतयितव्यंच

नागृह्यते सर्वस्यापिसंग्रहः । प्राणोमुख्योधारकस्तेनविधारयितव्यंपृथिव्यादिकंसर्वं ॥ ५ ॥ कथंसर्वस्यतदधीनतेत्युच्यते ॥ एष हीति ॥ चक्षुरादीनामेतेषामेषहिदर्शनादिशक्तिप्रदः । स्वयंचविज्ञानात्माविज्ञानस्वरूपः । सर्वज्ञइतियावत् । पुरुषःपूर्णत्वात् । अतश्चोपपन्नंतस्यसर्वाश्रयत्वमिति ॥ तदस्यविज्ञानात्मनोवेदनस्यफलमुच्यते ॥ सयइति ॥ सविज्ञानात्मापुरुषोयोयादृशलक्षणमेतमेवंविध मच्छायमविद्यारहित मतएवाशरीरं तस्मादेवालोहितं लोहितादिरूपरहितं शुभ्रंशुद्धं । प्राकृतरूपाद्यभावेपिअप्राकृतशुभ्रादिरूपयुक्तंवा । अतएवाक्षरंनक्षरतीति । हेसोम्ययोवेदयतेविजानातिससर्वज्ञःसर्वप्रधानस्य सर्वकारणस्यच परिज्ञानात्सर्वज्ञइव । तत्सदृशत्वात्सर्वस्यसर्वज्ञएववा । सर्वस्यापिकर्मादेर्ज्ञानस्यफलंपरमात्मज्ञानंप्राप्तमनेनेतिवा । ज्ञानीस्तूयते सर्वं भवति । सर्वपरिपूर्णपरंब्रह्मतद्भवति । तद्भूतइवतत्प्रविशतीतियावत् । तदेषश्लोकः । विज्ञानात्माविज्ञानस्वरूपोजीवःशरीरेसुखंभवतीतिह्युक्तं । प्राणाश्चक्षुरादयःतद्विषयाश्चरूपादयोभूतानिपृथिव्यादीनितन्मात्राश्च सर्वैर्देवैरभिमानिभिःसूर्याद्यैःसह । यत्रयस्मिन्नक्षरेब्रह्मणिसंप्रतिष्ठंतिसंप्रतिष्ठंते तदेतदक्षरंवेदयतेविजानातियःपुरुषः । सोम्येतिकस्यचित्संबुद्धिः । सउक्तप्रकारेणसर्वज्ञःसर्वंपरंब्रह्माविवेशैवाविष्टएवध्रुवमाविशत्येवेति ॥ ६ ॥ इतिचतुर्थप्रश्नप्रतिवचनं ॥ ४ ॥ अथहैनंशैब्यः । एवमुक्तलक्ष

उप० । प्राणश्चविधारयितव्यंच ॥ ५ ॥ एषहिद्रष्टास्प्रष्टाश्रोताघ्रातारसयितामंताबोद्धाकर्ताविज्ञानात्मापुरुषः । सयोहवैतमच्छायमशरीरमलोहितंशुभ्रमक्षरंवेदयतेयस्तुसोम्यसर्वज्ञःसर्वंभवति । तदेषश्लोकः । विज्ञानात्मासहदेवैश्चसर्वैःप्राणाभूतानिसंप्रतिष्ठंतियत्र । तदेतदक्षरंवेदयतेयस्तुसोम्यससर्वज्ञःसर्वमेवाविवेशेति ॥ ६ ॥ **चतुर्थःप्रश्नः** ॥ ४ ॥ अथहैनंशैब्यः

गंपरंब्रह्म येनमंत्रेणोपासितव्यं उपासितंचयत्फलंप्रयच्छति तदिदानींवक्तुमयमुत्तरोग्रंथः । भगवन्नेतदेतेषुमनुष्येषु सयो यःक श्चित्प्रायणांतंप्रयाणपर्यंतं यावच्छरीरादुत्क्रमणंतावदितियावत् । ॐकारमोमित्याक्रियमाणंपरमात्मानमभिध्यायीत सर्वदाचिं तयेदोमितिमंत्रेणेत्यभिप्रायः । सपुरुषस्तेनध्यानेनकतमंलोकंजयति प्राप्नोतीत्येवंपृष्टवतेतस्मैसहोवाच । यदोंकारःॐमित्याक्रिय माणंवस्तु तदेतत्परंचापरंचब्रह्म । यस्मात्प्रणवोमुख्यतःपरमात्मनःप्रतिपादकः यस्माच्चतत्प्रतिमात्वेनामुख्यतोविरिंचप्रतिपादक श्च । तस्माद्विद्वान्प्रणवेनोपासकः एतेनैवोपासनाख्येनायनेन गमनसाधनेन । परापरब्रह्मणोरेकतरमन्वेतिप्राप्नोति । किंप्रणवो पासनमात्रेणैकतरमन्वेति । नैवं । यथावज्ज्ञात्वोपासनेनैवेत्युच्यते ॥ सइत्यादि ॥ अकारोकारमकाराख्यांशत्रययुक्तोहिप्र णवः । तत्रसउपासकोयद्येकमात्रमेकामात्रावाचिकायस्यतंपरमात्मानं प्रणवेनाभिध्यायीत । कामप्येकामेवमात्रांसम्यग्विदित्वा इतरेअविज्ञायेतियावत् । तर्हिसउपासकस्तेनैवध्यातेनपरमात्मनासंवेदित एहीतिसंबोधितइव देहपातानंतरंक्षिप्रमेवजगत्यांपृथि व्यामभिसंपद्यतेप्राप्नोति । जन्मेतिशेषः । कथंकीदृशंजन्मेति । तमुपासकमृचःऋग्वेदाभिमानिदेवताःपृथिव्यांमनुष्यलोकंमनु ष्यशरीरंद्विजाग्र्यलक्षणमुपनयंते प्रापयंति । सचतत्रजन्मनितपआदिसंपन्नस्तत्फलरूपंमहिमानमनुभवति।अथयदिद्विमात्रेणद्वे

उप० । सत्यकामःपप्रच्छ । सयोहवैतद्भगवन्मनुष्येषुप्रायणांतमोंकारमभिध्यायीत कतमंवावसतेनलोकंजयतीति । तस्मैसहोवाच । ए तद्वैसत्यकामपरंचापरंचब्रह्मयदोंकारः । तस्माद्विद्वानेतेनैवायनेनैकतरमन्वेति । सयद्येकमात्रमभिध्यायीतसतेनैवसंवेदितस्तूर्णमेवजगत्यामभिसं पद्यते । तमृचोमनुष्यलोकमुपनयंते । सतत्रतपसाब्रह्मचर्येणश्रद्धयासंपन्नोमहिमानमनुभवति । अथयदिद्विमात्रेण

मात्रेवाचिकेयस्यतेनपरमात्मनामनसिसंपद्यतेसंगतोभवतीति । तिसृषुप्रणवमात्रासु येकेवा द्वेमात्रेसम्यग्ज्ञात्वाऽन्यामविज्ञायपरमात्मानंचिंतयतीतियावत् । तर्हिसउपासकोयजुर्भिर्यजुर्वेदाभिमानिदेवताभिरंतरिक्षस्थंसोमलोकमुन्नीयते । नीतश्चसतत्रसोमलोकेविभूतिमैश्वर्यमनुभूयपुनरावर्तते । ततश्च्यवते। यतएवंतस्माद्यस्तुपुरुषएतंपरंपुरुषंत्रिमात्रेणतिस्रोमात्राअपिसम्यग्विदित्वेतियावत् । ॐमित्येतेनैवाक्षरेणाभिध्यायीत सध्याताध्येयंपरमेश्वरमपरोक्षीकृत्य तेजोरूपेसूर्येसंपन्नस्तंप्राप्तोभवति । सूर्यंप्राप्यचासौयथापादोदरःसर्पस्त्वचाजीर्णयाविनिर्मुच्यते एवंखलुसध्यानीपाप्मनाप्रारब्धेनविनिर्मुक्तोभवति । विधूतपापश्चससामभिःसामाभिमानिदेवताभिःब्रह्मलोकंसत्याख्यमुन्नीयते । तत्रचएतस्मात्सत्यलोकपतेर्जीवघनाज्जीवसारात्सकलजीवोत्तमाद्विरिंचात्तदुपदेशेनेतियावत् । परात्परमुत्तमोत्तमंपुरिशयंसकलजीवशरीरेषुशयितंपुरुषंपूर्णवासुदेवमीक्षते । पुनरभिवृद्धज्ञानोभवतीति । अत्रसम्यग्विदित्वाप्रणवेनभगवंतमुपासीनस्यविरिंचलोकप्राप्तिःफलमुक्तं तन्नोपपद्यते । देवान्देवयजोयांति मद्भक्तायांतिमामपीत्यादिविरोधादित्याशंकांपरिहर्तुमाह ॥ प्रणवेनेति ॥ पुरुषमीक्षित्वाचतंप्राप्नोतीत्यत्रव्याख्यातव्यं । समाख्यावशादतोनवि

उप० । मनसिसंपद्यतेसोंतरिक्षंयजुर्भिरुन्नीयतेसोमलोकं ससोमलोकेविभूतिमनुभूयपुनरावर्तते । यःपुनरेतंत्रिमात्रेणोमित्येतेनैवाक्षरेणपरंपुरुषमभिध्यायीतसतेजसिसूर्येसंपन्नोयथापादोदरस्त्वचाविमुच्यतेएवंहवैसपाप्मनाविनिर्मुक्तःससामभिरुन्नीयतेब्रह्मलोकं । सएतस्माज्जीवघनात्परात्परंपुरिशयंपुरुषमीक्षते ॥ २ ॥

भा० । प्रणवेनहरिंध्यायन्ब्रह्मलोकंसमेत्यच ।

रोधइतिभावः । यएतच्छांतमितिमंत्राच्च । एतेनैकतरमन्वेतीत्यपिविवृतंभवति अपरंब्रह्मप्राप्यपरमप्यन्वेतीति । अत्रयद्विमात्रेणेत्यादिद्वितीयांतत्वेनविपरिणाम्यप्रणवस्यैवपरमात्मप्रतीकतयोपास्यत्वंपरैरुक्तं तदपिप्रणवेनहरिमित्युक्त्यैवपरास्तं । ओंकारमभिध्यायीतेतितत्रतत्रद्वितीयाश्रवणात्त्यजेदेकंकुलस्यार्थइतिन्यायाद्विपरिणामोऽयुक्तइतिचेन्न। तृतीयायाअपिबहुशःश्रवणात् समाख्यात्वस्माकमतिरिच्यते । त्रिमात्रेणोमित्येतेनैवाक्षरेणेत्युपसंहारश्चगरीयान् । ज्ञानंचतुर्मुखात्प्राप्येत्यनेन पराज्जीवघनादपिपरंपुरुषमीक्षतइत्येतदपव्याख्यानंप्रत्युक्तंभवतीति ॥ तदेतौश्लोकौभवतः ॥ तिस्रोऽकाराद्याःप्रणवमात्रा अनविप्रयुक्ताः विप्रयुक्ताअन्योन्यमसंबद्धाः एकैकशोज्ञाताः विप्रयुक्तानभवंतीत्यविप्रयुक्ताः नअविप्रयुक्ताअनविप्रयुक्ताः विप्रयुक्ताएवेत्यर्थः । अन्योन्यसक्ताः परस्परंयुग्मतयासंबद्धाः । ये के वा । द्वेद्वेज्ञात्वेतियावत् बाह्याभ्यंतरमध्यमासुतारमंद्रमध्यमरूपासूच्चारणक्रियासुप्रयुक्ताउच्चारिता मृत्युमत्योभवंति । एकैकामेववा द्वेवा येकेचित्सम्यक्ज्ञात्वा शेषमज्ञात्वो च्चैर्वानीचैर्वा मध्यममानेनवो च्चारिताःप्रणवमात्रा नापुनरावृत्तिफलंप्रापयंतीत्यर्थः । तासुसम्यक्प्रयुक्तासु तिस्रोपिसम्यग्ज्ञात्वोच्चारितासु सतीषुज्ञोज्ञानी नकंपतेनच्यवते । अपुनरावृत्तिफलंप्राप्नोतीति । एतदर्थविवरणार्थोद्वितीयोमंत्रः । एकमात्राज्ञानपूर्वकोपासनादृग्भिरेतंपृथि

भा० । ज्ञानंचतुर्मुखात्प्राप्यमुच्यतेनात्रसंशयः ॥ ५ ॥ प्र०

उप० । तदेतौश्लोकौभवतः । तिस्रोमात्रामृत्युमत्यःप्रयुक्ताअन्योन्यसक्ताअनविप्रयुक्ताः । क्रियासुबाह्याभ्यंतरमध्यमासुसम्यक्प्रयुक्तासुन कंपतेज्ञः ।

ख्याख्यंमानुषंलोकमुपासकोनीयते । द्विमात्राज्ञानपूर्वकोपासनाद्यजुर्भिरंतरिक्षंतत्रत्यंसोमलोकंनीयते । यत्तत्कवयोज्ञानिनोवेदयंतेजानंतिज्ञापयंतिवा परात्परंब्रह्म यत्तच्छांतंसुखोत्कर्षसीमाभूमिरूपं अजरंजरादिवर्जितं परात्परंसर्वोत्तमं तं तद्ब्रह्मोंकारेणैवायनेन अयनसाधनमोंकारंमात्रात्रयात्मकंसम्यग्ज्ञात्वेतियावत् । सामभिरन्वेतीति ॥ ७ ॥ इतिपंचमप्रश्नप्रतिवचनं ॥५॥ अथहैनंसुकेशाः । प्राक्प्राणादीनांशरीरिणश्चजाग्रत्स्वप्नसुषुप्तिषुपरमेश्वराधीनत्वमभिहितं । नतुमोक्षे । अतःसिंहावलोकन्यायेनमुक्तावपितेषांभगवदधीनत्वप्रदर्शनार्थउत्तरोग्रंथः । प्रष्टव्यार्थेतिशयितबुभुत्सांस्वस्यज्ञापयितुंपूर्ववृत्तांतकथनं । भगवन्हिरण्यनाभोनामतः कोसलायांभवःकौसल्यः कस्यचिद्राज्ञःपुत्रोमामुपेत्यप्राप्यएनंवक्ष्यमाणंप्रश्नंप्रष्टव्यमर्थमपृच्छतापृच्छत् । हेभारद्वाज षोडशकलोनामकश्चित्पुरुषोस्तीतिसामान्यतोमयाश्रुतं तंषोडशकलंपुरुषंत्वंवेत्थविशेषतोजानासिकिं कोसौपुरुषः क्वचास्ते कानामषोडशकलाः कथंचतस्यषोडशकलत्वमित्यादि।यदिचजानासितं तर्हिमह्यंब्रूहीति । एवंपृष्टवंतंतंकुमारंपूर्ववयसिवर्तमानंहिरण्यनाभमहमब्रुवं।अहमिमंत्वयापृष्टंषोडशकलंपुरुषंनवेदनजानामि।कुतः यद्यहमिमंपुरुषमवेदिष्यंविदितवानभविष्यं तर्हिकथंकस्माद्योग्यायतेतुभ्यंनावक्ष्यमिति । अतोनाहमिमंवेद । किंचयःपुरुषोनृतमभिवदति सएषसमूलःपरिशुष्यतिवै सर्वात्मनागतसारोभ

उप० । ऋग्भिरेतंयजुर्भिरंतरिक्षंसामभिर्यत्तत्कवयोवेदयंते । तमोंकारेणैवायतनेनान्वेतिविद्वान्यत्तच्छांतमजरममृतमभयंपरात्परंचेति ॥ ३ ॥ **पंचमःप्रश्नः ॥५॥** अथहैनंसुकेशाभारद्वाजःपप्रच्छ । भगवन्हिरण्यनाभःकौसल्योराजपुत्रोमामुपेत्यैनंप्रश्नमपृच्छत । षोडशकलंभारद्वाजपुरुषंवेत्थ । तंमह्यंब्रवीहीति । तमहंकुमारमब्रुवंनाहमिमंवेदयद्यहमिममवेदिष्यंकथंतेनावक्ष्यमिति । समूलोवाएषपरिशुष्यति

वति । तेनार्जितंसमस्तमपिसुकृतंनश्यतीतियावत् । यतएवंतस्माज्ज्ञात्वापिनजानामीत्यनृतंवक्तुंदोषज्ञोहंनार्हामिनार्होभवामीत्येवमनेकप्रकारतःप्रत्यायितःसलज्जयातूष्णींकिमप्यवदन्रथमारुह्यप्रवव्राज । यथागतंतथागतवान् । एवंतदाप्रभृतिज्ञातव्यतयाममहृदिवर्तमानंतंपुरुषंत्वात्वांपृच्छामि किमिति असौषोडशकलःपुरुषःक्वास्तेकश्चासौषोडशकलः । काश्चताःकलाःकथंचासौषोडशकलःपुरुषइत्यादि इति एवंपृष्टवतेतस्मैसहोवाच । वक्ष्यमाणलक्षणैर्विष्णुरेवासौपुरुषइतिसेत्स्यतीत्यभिप्रायेणशिष्टस्यपरिहार उच्यते ॥ इहैवेति ॥ हेसोम्ययस्मिन्पुरुषेएताःवक्ष्यमाणाःप्राणाद्याःषोडशसंख्याकाःकलाःसजीवस्यशरीरस्यभागाःप्रभवंति । यस्मादुत्पद्यंतेयस्मिंश्चप्रविष्टाभवंति । मुक्ताःसत्योयमाश्रित्यवर्तंते । अनेनषोडशकलत्वंतस्यकथमितिपरिहृतंभवति । सपुरुषइहैवशरीरेशरीरस्यांतरास्ते । नावश्यंतद्दर्शनायदूरंगंतव्यमित्यभिप्रायः । यस्मिन्नेताःषोडशकलाःप्रभवंतीत्युक्तंप्रपंच्यते ॥ सइत्यादि ॥ सपुरुषःकल्पादौकलाःसृजानीतीक्षांचक्रेचिंतितवान् । पुनश्चकस्मिन्पुरुषेशरीरादुत्क्रांतेऽहमुत्क्रांतोभविष्यामि कस्मिन्वा तत्रप्रतिष्ठितेऽहमपिप्रतिष्ठास्यामिप्रतिष्टो (ष्ठितो) भविष्यामि । कोनुमद्वशीकरणक्षमभक्तिज्ञानादिसंपन्नोयंनिमित्तीकृत्याहंकलाःसृजानीत्येवमीक्षित्वा ताद्दशःप्राणएवेतिनिश्चित्य सपुरुषःप्राणंजीवकलाभिमानिनमसृजत् । प्राणात्तंप्राणंनिमित्तीकृत्य

उप० । योनृतमभिवदति तस्मान्नार्हाम्यनृतंवक्तुं । सतूष्णींरथमारुह्यप्रवव्राज । तंत्वापृच्छामिक्वासौपुरुषइति ॥ १ ॥ तस्मैसहोवाच । इहैवांतःशरीरेसौम्यसपुरुषोयस्मिन्नेताःषोडशकलाःप्रभवंतीति। सईक्षांचक्रे कस्मिन्नहमुत्क्रांतउत्क्रांतोभविष्यामिकस्मिन्वाप्रतिष्ठितेप्रतिष्ठास्यामीति।

श्रद्धां जीवस्यास्तिक्यनिष्ठामसृजत् । ततःखंवायुर्ज्योतिरापःपृथिवीत्येतानिशरीरोपादानभूतानिभूतानि इंद्रियंचक्षुरादि । प्रवृत्तावुपकरणं मनःप्रधानकारणं अन्नंतत्स्थितिकारणं तस्माच्चान्नादन्नंनिमित्तीकृत्यवीर्यंशरीरहेतुभूतं तपोजीवस्यज्ञानादिहेतुतयासुखसाधनं मंत्राःऋगादिवेदाःसम्यग्ज्ञानादिहेतवः कर्मपुण्यापुण्यलक्षणंसुखादिनिमित्तं लोकाःगोलकाःइंद्रियाश्रयभूताः । नामच देवदत्तादिकमित्येताःकलाःपुरुषेणसृष्टाइति । अत्रसप्राणमसृजत प्राणाच्छ्रद्धामित्यादौ अन्नाद्वीर्यमितिमध्ये लोकेषुसृष्टेषु सत्सुनामचेत्यंतेऽपिकथनेन पूर्वपूर्वोत्पन्नांकलांनिमित्तीकृत्योत्तरोत्तरकलापरमेश्वरेणसृष्टेतिसूचयति । एतासांचकलानां यथेत्यादिना जीवेनसहमोक्षेपुरुषप्राप्तिरुच्यते । नचासावुपपद्यते । कलानांजडत्वेनमोक्षासंभवादित्यतोऽत्रकलाशब्देनतदभिमानिदेवताविवक्षिताइतिभावेनव्याख्यानरूपांस्मृतिमुदाहरति ॥ कर्मेति ॥ इंद्रियेशाश्चसूर्याद्याइत्यस्यैवविवरणं ॥ चक्षुराद्यभिमानिनइति ॥ चक्षुषःसूर्यः श्रोत्रस्यदिश इत्येवंसूर्याद्यायथा(संभवं)संख्यंचक्षुराद्यभिमानिनोनतुसर्वेसर्वेषामिति । ननुरुद्रादयोमनोदेवताःक्वचिच्छ्रूयंते सत्यं तेपिभवंतीत्याह ॥ रुद्रइति ॥ सर्वेषांप्रभवाप्ययेत्यनेनपूर्वोत्पन्नानांपश्चादुत्पन्नान्सर्वान्प्रतिस्वाम्य

उप० । सप्राणमसृजतप्राणाच्छ्रद्धांखंवायुर्ज्योतिरापःपृथिवींद्रियंमनोन्नमन्नाद्वीर्यंतपोमंत्राःकर्मलोकालोकेषुनामच ॥ २ ॥

भा० । कर्मेतिपुष्करःप्रोक्तउषानामाभिमानिनी । लोकाभिमानीपर्जन्यःस्वाहावैमंत्रदेवता । तपोभिमानीवह्निश्चवरुणोवीर्यदेवता । अन्नस्यदेवतासोमोमनोनामानिरुद्धकः । इंद्रियेशाश्चसूर्याद्याश्चक्षुराद्यभिमानिनः । रुद्रोवींद्रःशेषकामौमनसस्त्वेवदेवताः । श्रद्धेतिवायोःपत्नीस्यात्सर्वेषां प्रभवाप्यया ।

मस्तीतिसूचितं । तंज्ञात्वेत्यनेन अराइतिमंत्रोऽव्याख्यातोभवति । अत्र सप्राणमसृजत । प्राणाच्छ्रद्धामित्याद्युक्त्याकलानामुत्पत्तावयंयथोक्तएवक्रमइत्यन्यथाप्रतीतिःस्यात् । तांनिवारयति ॥ एतस्मादिति ॥ नकलानामुत्पत्तावयमेवक्रमोज्ञातव्यः । तथासत्येतस्मादितिमंत्रविरोधात् । तत्रमनसोनंतरमिंद्रियाणांततोभूतानांचजन्मश्रवणादित्यर्थः । एतद्वाक्यविरोधान्मंत्रएवकिंनान्यथाव्याख्यायतइत्यतआह ॥ नहीति ॥ कुतोनेत्यतआह ॥तदिति॥ प्रबलविशेषवचनसहकारिणामंत्रेणसामान्यवचनस्यबाधोयुक्तएवेतिभावः । अस्तुतर्हिइंद्रियमनोजन्मविषयेमंत्रस्यैतद्वाक्यबाधकत्वं अन्यत्रतु यथाश्रुतएवक्रमइत्याशंकांपरिहर्तुमशेषक्रमं विशेषवाक्यांतरेणदर्शयति ॥ विष्णोरिति ॥ प्राणोजातोऽवरश्चेत्यादियोज्यं रुद्रइत्युपलक्षणं । पूर्ववाक्योक्ताश्चग्राह्याः । एवमिंद्रइत्यपि । तेषुचयथायोग्यमुत्पत्त्यादि । तस्यसकाशात् । वरुणोवीर्यदेवता । ततःसृष्टस्ततउत्पन्नः । अग्निस्तपोभिमानी मरुद्भूतवायुदेवता । पावकाख्यस्तेजोदेवता । ततोमरुदुत्पत्त्यनंतरं । तस्मान्मरुतोजातःपर्जन्योलोकाभिमानी । नकेवल

भा० । तस्याश्चकारणंप्राणःसर्वेषामुत्तमोत्तमः । तस्यापीशःकारणंचवासुदेवःपरोऽव्ययः । नतस्यसदृशःकश्चित्कुतएवोत्तमोभवेत् । तंज्ञात्वामुच्यतेजंतुर्विदित्वैवंपरात्परमितितत्वविवेके । एतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिच । खंवायुर्ज्योतिरापःपृथिवीविश्वस्यधारिणीतिमंत्रोक्तएवक्रमः । नहींद्रियेभ्योमनःपश्चात् । तत्प्राक्छ्रुतेश्चेतिभगवद्वचनं । विष्णोःप्राणस्ततःश्रद्धातस्यारुद्रोमनोभिधः । तस्मादिंद्रस्त्विंद्रियात्मातस्यसोमोन्नदेवता । ततश्चवरुणःसृष्टस्तस्मादग्निस्ततोवरः । आकाशदेवताविघ्नस्ततोवायोःसुतोमरुत् । तस्मादग्निःपावकाख्यःप्रथमोग्नेःसुतस्ततः । ततःपर्जन्यउद्भूतःस्वाहातोमंत्रदेवता । उदात्मकोबुधस्तस्याउषानामात्मिकाततः । ततःशनिःपृथिव्यात्माकर्मात्मापुष्करस्ततः ।

मेतेसंसारेक्रमवंतः । किंतर्हिमोक्षेपीत्याह ॥ **क्रमादिति** ॥ यथाप्राणादीनांश्रद्धादिभ्यउत्तमत्वमात्रं नतथाप्राणाद्विष्णोरित्याह ॥ **नित्यमुक्तइति** ॥ ततस्तेभ्यःसर्वेभ्यःप्राणादपि । अत्रोक्ताएवभूतदेवताःपूर्ववाक्येपिग्राह्याः । यस्मिन्नेताःषोडशकलाःप्रभवंतीतिकलानांमुक्तौपरमपुरुषाश्रयत्वमभिधाय यथेत्यादितद्विवरणवाक्ये सदृष्टांतंपुरुषैक्यमुच्यते । यथालोकेइमानद्यःस्यंदमानाःस्रवंत्योगच्छंत्यइतियावत् । समुद्रायणाःसमुद्रगमनस्वभावाः । समुद्रंप्राप्यास्तंस्वरूपतिरस्कारंगच्छंति । तासांचभिद्येतेविनश्यतः । नामरूपेगंगायमुनाइत्यादिलक्षणे । तद्भेदे समुद्रइत्येवंप्रोच्यतेतदुदकलक्षणंवस्तु । एवमेवास्यपरिद्रष्टुर्जीवस्येमाःषोडशकलाःपुरुषायणाःपुरुषंप्राप्यास्तंगच्छंति । तासांचनामरूपेप्राणइत्यादिरूपेभिद्येते । नाशेचनामरूपयोर्यदनष्टंचैतन्यंतत्पुरुषएवेत्युच्यतेविद्वद्भिः । ततःसएषजीवोकलोऽमृतोभवतीति । तदेतत्कथमित्यतोमुक्तेश्वरभेदस्यात्रानुपलभ्यमानत्वाद्यस्मिन्नितितदुक्तिरयुक्तेतिशंकापरिहाराय भेदएवसमर्थ्यतइतिभावेनाह ॥ **समुद्रइति** ॥ समुद्रेपुरुषेइतिसप्तमीनप्रथमेत्यर्थः । तत्कुतइत्यतआह ॥ **भिद्येतेइति** ॥ समुद्रंप्राप्तानांनदीनां पुरुषंप्राप्तानांकलानांच परस्परंसमुद्रादेश्च विविक्तनामरूपवत्त्वस्योक्तत्वात्। प्रथमांतत्वांगीकारेतद्विरोधःस्यात्। नहिनद्यादीनांसमुद्रादिभिरैक्यं विविक्तनामरूपवत्त्वंचेतियुज्यते।अतःसप्तम्यंतत्वमे

भा० । क्रमात्प्रत्यवराह्येतेमुक्ताःसर्वगुणैरपि । नित्यमुक्तस्ततोविष्णुःप्राणादप्युत्तमोत्तमइतिच ।

उप० । यथेमानद्यःस्यंदमानाःसमुद्रायणाःसमुद्रंप्राप्यास्तंगच्छंति भिद्येतेतासांनामरूपे समुद्रइत्येवंप्रोच्यते ।

भा० । समुद्रइत्येवंप्रोच्यते । पुरुषइत्येवंप्रोच्यते ।

वेत्यर्थः । तर्हिंभिद्येतेतासामित्यादिवाक्यस्यकथंयोजनेत्यतआह ॥ अज्ञैरिति ॥ अस्तंगच्छंतीत्यस्यानुवादोअज्ञैरिति । तथा हिवक्ष्यति । तथाचेयमक्षरयोजना । नद्यःसमुद्रंप्राप्यास्तमदर्शनंगच्छंति । अज्ञानामदर्शनंगतानामपितासां समुद्रेस्थितानांनामरूपेभिद्येतेविविक्तेएवतिष्ठतइत्येवंविद्वद्भिःप्रोच्यते । एवंकलाअपिजीवमोक्षकालेमुक्ताःपरमपुरुषंप्राप्यादर्शनंगच्छंति तथापिपुरुषेस्थितानांतासांनामरूपेविविक्तेएवतिष्ठतइत्येवंविद्वद्भिःप्रोच्यते । ततश्चकलादेवतासुमुक्तिंगतासु सएषजीवोनष्टाचेतनकलोभवति । ततएवामृतोभवति । कलानिमित्तंहिमरणमस्येति । ननुभिद्येतेइत्यस्यनाशोर्थोमयांगीक्रियते । तत्कथंप्रथमांतत्वेएतद्विरोधइत्यतआह ॥ नचेति ॥ दृष्टएवघटोभिन्नइत्यादौनाशेचप्रयुज्यमानोभेदशब्दइत्यतआह ॥ घटादावपीति ॥ बहुभावे अवयवविभागे कथंतर्हिंभिन्नोघटइतिप्रयोगेनष्टइतिप्रत्ययःश्रोतृणामित्यतआह ॥ नाशस्त्विति ॥ भिन्नशब्दाज्ज्ञातावयवविभागेनश्रोत्रा यस्यावयवविभागस्तस्यनाशमंतरेणासावनुपपन्नइति अनुमानेनैवनाशोवगम्यते । नशब्दशक्त्येत्यर्थः । अस्तुतर्हिंप्रकृते

भा० । भिद्येतेतासांनामरूपे । भिद्येतेचासांनामरूपेइत्युक्तत्वात् । अज्ञैरनवगतान्यपिसमुद्रेस्थितानांनदीनांविष्णौस्थितानांमुक्तानांचभिन्नान्येवनामरूपाणिसंत्येवेत्यर्थः ।

उप० । एवमेवास्यपरिद्रष्टुरिमाःषोडशकलाःपुरुषायणाःपुरुषंप्राप्यास्तंगच्छंति । भिद्येतेचासांनामरूपेपुरुषइत्येवंप्रोच्यते । सएषोकलोऽमृतोभवति ॥ ३ ॥ तदेषश्लोकः । अराइवरथनाभौकलायस्मिन्प्रतिष्ठिताः । तंवेद्यंपुरुषंवेदयथामावोमृत्युःपरिव्यथाइति ॥

भा० । नचभेदशब्दोनाशेप्रयुज्यमानःक्वापिदृष्टः । घटादावपिबहुभावएवभेदशब्दःप्रयुज्यते । नाशस्त्वर्थतएवावगम्यते ।

प्यर्थतएवनाशावगमः । नहिशब्दशक्त्यैवेतिप्रतिज्ञातमस्माभिरित्यतआह ॥ नचेति ॥ कुतोनेत्यतआह ॥ नहीति ॥ नहि घटादाविवनामरूपयोरवयवविभागोभेदशब्देनोच्यतइतिवक्तुंशक्यते । येनतदनुपपत्त्यानाशंनिश्चिनुमः । अद्रव्यत्वात् । नह्यनुपपद्यमानादर्शनेप्युपपादकेबुद्धिर्भवतीत्यर्थः । यतएवंभेदशब्दः शक्तितोर्थतश्च ननाशवाचकोऽतउक्तरीत्यापृथक्त्वपरएव । ततश्चैतद्विरोधात्समुद्रादिपदंसप्तम्यंतमेवेति । उपसंहरति ॥ अतइति ॥ किंच तदेषश्लोकः अराइवेत्युक्तार्थसंमतित्वेनोदाहृतमंत्रेकलानांपरमपुरुषाश्रयत्वस्योक्तत्वात् । अत्रापिपुरुषपदंसप्तम्यंतमेवेत्याह ॥ अराइति ॥ पुरुषशब्दस्यसप्तम्यंतत्वोपपादनमुपसंहरति ॥ अतइति ॥ अरारथनाभाविवकलाःप्राणाद्यायस्मिन्प्रतिष्ठितास्तंवेद्यंपुरुषार्थकामैर्ज्ञातव्यंपुरुषंवासुदेवंवेदयथाःजानीध्वं हेशिष्याइतिकस्यचिद्वाक्यं । ततश्चमृत्युःसंसारोवोयुष्मान्मापरिव्यथाःमापरिव्यथयतु । परमपुरुषाज्ञाने संसारव्यथाभवेत् । साभवतांमाभवत्विति । एवंचेत्समुद्रंप्राप्यास्तंगच्छंतीतिपुरुषंप्राप्यास्तंगच्छंतीतिस्वरूपतिरस्कारोक्तिःकथमित्यतःप्राक्सूचितमेवार्थंविवृणोति ॥ अस्तगमनंत्विति ॥ एवंसमर्थितंवाक्यार्थंवाक्यांतरसमाख्ययापिसमर्थयते ॥ प्राणादयइति ॥ ननुमदुक्तार्थेपि यथानद्यःस्यंदमानाःसमुद्रेस्तंगच्छंतिनामरूपेविहाय ॥ तथाविद्वान्नामरूपाद्विमुक्तःपरात्परंपुरुषमुपैतिदिव्यमि

भा० । नचात्रार्थतोपिनाशोवगम्यते। नहिनामानिरूपाणिचकपालवद्बहुधाभूतानितिष्ठंति । अतोभिद्येतेइतिपृथक्त्वमेवोच्यते । अराइव रथनाभौकलायस्मिन्प्रतिष्ठिताइतिवाक्यशेषाच्च । अतःपुरुषेभिन्नानिभिन्नानिनामरूपाणिप्रतिष्ठितानीत्येवार्थः । अस्तगमनंत्वादित्यवदज्ञानामविज्ञेयत्वमेव । प्राणादयःकलायस्मिन्मुक्तानित्यंप्रतिष्ठिताः ॥ पृथक्पृथङ्नामरूपैर्नमस्तस्मैपरायतइतिसत्तत्वे ।

तिमंत्रसमाख्यास्ति । अत्रहिमुक्तस्यनामरूपाद्विमुक्तत्वमुच्यतइत्यतआह ॥ **नामरूपादिति** ॥ वीत्युपसर्गस्स्ववर्जनार्थतायाःवि प्रियादिशब्देदर्शनादत्रापितथात्वेनविमुक्तइत्यमुक्तत्वमुच्यतइत्यर्थः । नचसमासानुपपत्तिः । मुक्तशब्दस्यभावप्रधानत्वोपपत्तेः । भावेवायंक्तप्रत्ययः । ततश्चविगतंमुक्तंमुक्तिरस्मादित्यतिचतुरश्रं । एवंसतिपूर्वार्धोक्तदृष्टांतविरोधःस्यात् । तत्रनामरूपेविहाये ति तद्धानस्योक्तत्वादित्यतआह ॥ **नामरूपेइति** ॥ पूर्वत्र पूर्वार्धेपिअविहायेत्येवयोज्यं । नतुविहायेतीत्यर्थः । कुतएवंपूर्वोत्त रार्धयोजनेत्यतआह ॥ **अनंतमिति** ॥ विश्वेदेवाइतिरूपस्यानंतत्वमुच्यते मोक्षेपिभेदश्रुतिबाहुल्याच्चैवमेवार्थइत्याह॥**यत्रेति**॥ श्रुतिविरोधादेव मणीवादिवदत्राप्यप्रगृह्यत्वंवक्तव्यं । एतत्प्रश्नप्रतिवचनार्थप्रसंगादुपसंहरति ॥ **अतइति** ॥ एवंसपिप्पलाद स्तेभ्यस्तत्वमुपदिश्य तान्भरद्वाजादीन्प्रत्युवाच । किल । एतत् उक्तलक्षणंपरंब्रह्म अहमेतावदुक्तमात्रमेववेद नातःपरंमया विदितमस्तीति । अस्मदादयस्तदेकदेशविदएव । नत्वपरिमितविदइतिभावः । एवमुपदिष्टास्तेमुनयस्तमाचार्यमर्चयंतःप्रणामा

भा० । नामरूपाद्विमुक्तइत्यनेनापि नामरूपामुक्तत्वमुच्यते । विप्रियइत्यादिवत् । नामरूपेअविहायेतिचपूर्वत्र । अनंतंवैनामानंतावैविश्वेदे वाइतिनामरूपयोरनंतत्वंहिश्रुतिर्वक्ति । यत्रपूर्वेसाध्याःसंतिदेवाः । सतत्रपर्येतिजक्षन्क्रीडन्रममाणः । सोश्नुतेसर्वान्कामान्सहब्रह्मणाविपश्चिता । ऋचांत्वःपोषमास्तेपुपुष्वान्गायत्रंत्वोगायतिशक्करीष्वित्यादेश्च । अतःसर्वमुक्तेभ्योप्युत्तमोत्तमःपरिपूर्णोनारायणइतिसिद्धं ।

उप० । तान्होवाचएतावदेवाहमेतत्परंब्रह्मवेदनातःपरमस्तीति ।

दिनापूजयंतइदमूचुः । भगवंस्त्वंहिनःपिता निरुपाधिकोपकारकः । कथंयस्त्वमस्माकंअस्मानविद्यायाःपरंपारंतारयसि अतारयः । कोहिनामैवमुपकुर्यादिति । एवमाख्यायिकांसमाप्यवेदपुरुषःशिष्यशिक्षार्थमाह ॥ नमःपरमऋषिभ्यःपिप्पलादादिभ्यइति ॥ द्विर्वचनमादरार्थइति । अतएवभाष्यकारोप्यंतेचभगवत्प्रणामंनिबध्नाति ॥ नमइति ॥ वचनप्रसूनमालाजयतीर्थाख्येनभिक्षुणारचिता ॥ ध्रियतांहृदयेसदयेकमलामहिलेनपुरुषेण ॥ ७ ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितस्यषट्प्रश्नोपनिषद्भाष्यस्यविवरणंजयतीर्थभिक्षुविरचितंसंपूर्णं ॥ ७ ॥ श्रीकृष्णार्पणं ॥ ७ ॥

उप० । तेतमर्चयंतस्त्वंहिनःपितायोस्माकमविद्यायाःपरंपारंतारयसीति । नमःपरमऋषिभ्योनमःपरमऋषिभ्यः ॥ ४ ॥ ६ ॥ इतिश्रीषट्प्रश्नोपनिषत्समाप्ता ॥

भा० । नमोनमस्तुहरयेप्रेष्ठप्रेष्ठतमायते ॥ परमानंदसंदोहसांद्रानंदवपुष्मते ॥ ६ ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितंषट्प्रश्नोपनिषद्भाष्यंसंपूर्णं ॥ ७ ॥

॥ षट्प्रश्नटीकासंपूर्णा ॥

॥ षट्प्रश्नमंकालीयप्रारंभः ॥ 865

श्रीमद्धनुमद्भीममध्वातर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ श्रीवासुदेवमानम्यपूर्णबोधान्गुरूनपि ॥ करिष्ये प्रश्नषट्कीयभाष्यव्याख्यानपंचिकां ॥१॥ जयतीर्थश्रीमच्चरणःषट्प्रश्नभाष्यंव्याचिख्यासुः श्रीनारायणचरणनलिनपरागकर्तृक स्वावनप्रार्थनरूपं मंमलमादौनिबध्नाति ॥ पांत्विति ॥ पद्मंनाभौयस्यसपद्मनाभः । श्रीपदशब्दस्यपद्मनाभशब्दसापेक्षत्वेपि नित्यसापेक्षत्वेनरेणुशब्देनसमासोपपत्तिः । नोऽस्मान्पांतुरक्षंतु । इतरदेवतापादपांसून्विहायपद्मनाभपादपांसूनामेवप्रार्थनेको हेतुरित्यतःप्राप्ताशेषकामयापिरमयाअनुरागेणानिशंधृतत्वेनावगतामितगुणत्वादितिभावेनाह ॥ कमलेति ॥ कमलायाःकबरी लक्षणोयोभारःकेशपाशस्तस्य यत्सुरभीकरणं तस्मिन्नुद्यताउद्युक्ताइत्यर्थः । तेनभारशब्दस्यैवकेशपाशवाचित्वेनकबरीशब्दोऽव्य र्थइतिनाशंकनीयं । सामान्यविशेषभावेनावैयर्थ्यात् । सुरभीकरणोद्यताइत्यनेनपादपांसूनांपंकजपरागसादृश्यमुपपादितं । दृ ष्टांतादतिशयोपिदार्ष्टांतिकेऽवगम्यते । नहिनानाकुसुमपरागनिचयानांमिलितानामपिअतिसुंदरात्मकेंदिराकबरीभारसुरभीकर णोद्यमित्वंसंभवति । भगवतस्तुसद्देहःसुखगंधश्चेतिसुगंधशरीरावयवत्वात्तत्संबद्धरेणूनांतत्त्वंसंभवतीति । ननुभाष्यकारीयंन मोभगवतइत्याद्यमाद्यंपद्यंव्यर्थं । आथर्वण्याब्राह्मणोपनिषदोव्याख्यानस्यनिर्विघ्नपरिसमाप्त्याद्यर्थमंगलनिबंधनरूपंतदितिचेत् उपनिषदएवाधिकार्यादिशून्यतयाअनुपादेयत्वात् । अधिकार्यादिमत्त्वेनोपादेयत्वेप्यव्याख्येयत्वात् । गहनार्थत्वेनव्याख्येयत्वे पिवासुदेवस्यैवप्रणामेबीजाभावादित्यतआह ॥ इहेति ॥ अधिकार्यनधिकारिवर्गइत्यर्थः । खल्वितिवाक्यालंकारे । उक्तार्थस्यप्र सिद्धिद्योतनेवावर्तते । समुद्रोब्धिरकूपारःपारावारःसरित्पतिरित्यमरोक्तेःपारावारःसमुद्रः । जननीतनयमिवेत्यनेनतद्धत्केवला

नुकंपावशादेवोद्दिधीर्षुः उद्धर्तुमिच्छुरित्युक्तंभवति । एतच्चाभिमानिव्यपेक्षया ॥ [२१३] इतिकर्तव्यतामंतरेणेति ॥ साक्षादुपकार कांगंविनेत्यर्थः ॥ [२१३] न्यायगर्भंभाष्यंकरिष्यन्निति ॥ तत्वार्थनिश्चयेन्यायानांअंगत्वेन तत्प्रतिपादकभाष्यस्येतिकर्तव्यतात्व मितिभावः । एतच्च यत्तच्छांतमजरमित्यादिनेत्यादौ । वक्ष्यतइत्यस्यानुवृत्तिर्द्रष्टव्या ॥ [२१७] ईष्णुचप्रत्ययेनोक्तमिति ॥ आक्वेस्त च्छीलतद्धर्मतत्साधुकारिष्वित्यधिकृत्य भुवश्चेत्यनेनसूत्रेण ताच्छील्येऽर्थेप्रोपसृष्टस्यभूधातोरिष्णुच्प्रत्ययेनिष्पन्नस्यप्रभविष्णव इत्यस्यतत्स्वाभाव्यार्थत्वंयुक्तमित्यर्थः ॥ [२१७] वर्तमानापदेशेनेति ॥ सर्जनक्रियायाइदानींनिवृत्तत्वेपितत्स्वभावस्यानुवृत्तत्वेनव र्तमानार्थकलट्प्रयोगइतिभावः ॥ [२१८] वेधसइतीति ॥ वेधाविधौबुधेविष्णावितिविश्वकोशेवेधश्शब्दस्यबुधवाचकत्वोक्त्यामुख्य त्वात्सार्वज्ञार्थत्वसिद्धिः ॥ [२१९] तच्छेषतयेति ॥ तत्सृज्यत्वेनवासुदेवोपसर्जनत्वेनेत्यर्थः । प्रतिपाद्याइतिवचनविपरिणामेनानुवर्त ते । तज्ज्ञानफलंचसूचितमित्यन्वयः ॥ [२१०] उपासतइति ॥ उपास्तइत्यर्थः ॥ [२१०] तदेवंभवतीति ॥ तत्सदृशएवभवत्युपासकः । तदेव उपास्यगुणजातसदृशगुणजातमेवोपासकानांभवतीतिवार्थः ॥ [२१०] विरजोब्रह्मलोकइतीति ॥ ब्रह्माणिजीवाःसर्वेपीतिजी ववाचकोब्रह्मशब्दोभावप्रधानः । तथाचब्रह्मत्वस्यजीवत्वस्यानंदादिस्वरूपत्वस्यलोकःप्रकाशोनुभवःतेषांउपनिषदुक्तब्रह्मज्ञानि नांभवतीत्यर्थइत्यत्राभिप्रेतं । उत्तरत्रब्रह्मलोको वैकुंठादिःप्राप्योभवतीत्यर्थांतरमुक्तमितिज्ञातव्यं ॥ अथेति ॥ आद्यपद्यनिबं धनानंतरमित्यर्थः ॥ [२११] लाघवेनेति ॥ व्याख्यानरूपप्रमाणविरोधेनैवापव्याख्याननिराकरणंलभ्यतइतिलाघवमित्यर्थः ॥ [२१२] अ त्रेति ॥ उपनिषदीत्यर्थः ॥ [२१२] आख्यायिकेति ॥ उपलब्धार्थविषयककथेत्यर्थः । अतिप्रशस्ततराइयंविद्येत्यन्वयः । ननुश्रद्धा

दीनांनिष्प्रयोजनत्वेकैश्चिदनुष्ठानमात्रेणकथमनुष्ठेयत्वं । अतोनेदंतात्पर्यकथनंयुक्तमित्यतआह ॥ स्मर्यतेहीति ॥ सुकेशा
नामेतइति ॥ शोभनाःकेशायस्येतिविग्रहेसुकेशशब्दात्परस्यप्रथमैकवचनस्यसोःसुपांसुलुगित्यादिनाआकारादेशेसवर्णदीर्घेच
सुकेशेत्याकारांतंरूपंज्ञेयं ॥ कोसलायामिति ॥ नगर्यामितिशेषः । विदर्भेषु देशेषु । कदाचित्क्वचित्समवेताइत्यध्याहारोक्तिः
॥ अधिकारीति ॥ भक्तिमान्परमेविष्णौयस्त्वध्ययनवान्नरइत्याद्युक्तेरितिभावः ॥ १ ॥ यद्यपियूयंप्रागेवतपआदिसंपन्नाइत्ये
तद्भूयएवतपसेत्याद्युक्तेस्तात्पर्यवचनं । इंद्रियमात्रनिग्रहवाचिनातपःशब्देनगुह्येंद्रियनिग्रहरूपब्रह्मचर्यवाचिनोब्रह्मचर्यशब्द
स्यागतार्थत्वायविशेषतोपीत्युक्तं । उत्तरत्रपृच्छतेतिलटोविद्यमानत्वात्तदनुसारेणसंवत्स्यथेतिलृडपिलडंतत्वेनव्याख्यातः । सर्वं
हवोवक्ष्यामइत्यत्रहशब्दस्यतत्रैवसंबंधेकिलार्थत्वासंभवाद्व्यत्यस्तान्वयेचतान्हसऋषिरुवाचेत्यत्रविद्यमानेनपौनरुक्त्यमित्यतआह
॥ नह्येवंसतीति ॥ २ ॥ उपसदनमिति ॥ विनयपूर्वकंसमीपेवस्थानमित्यर्थः । ननुसुकेशाचभारद्वाजइतिप्रथमोक्तस्यऋ
षेःप्रश्नप्रतिवचनेऽनुक्त्वांतिमस्यकात्यायनस्यप्रथमतःप्रश्नप्रतिवचनकथनंकिमर्थंकृतमित्यतआह ॥ पाठक्रमादिति ॥ पूर्वमी
मांसायांप्रथमेध्याये अर्थाच्चेत्यधिकरणे ऽग्निहोत्रंजुहोति यवागूंपचति इत्युदाहृत्यायंन्यायउदाहृतः । तथाहि । क्रमेणवानिय
म्येतक्रत्वेकत्वेतद्गुणत्वादित्यधिकरणेसमिधोयजतितनूनपातंयजतिइडोयजतिबर्हिर्यजतिस्वाहाकारंयजतीत्युक्तपंचप्रयाजेषुवा
क्यपाठक्रमेणैवक्रमःप्रदर्शयिष्यते । वाक्यक्रमेणैवबुद्ध्यारूढानांप्राप्तक्रमस्यत्यागेकारणाभावात् । तथाग्निहोत्रहोम यवागूपाक
योरपि वाक्यक्रमेणैवक्रमःप्राप्नोति । उक्तन्यायसाम्यादिति पूर्वपक्षंप्रापय्यार्थाच्चेतिजैमिनिनाराद्धांतितं । अर्था त्प्रयोजनवशादि

त्यर्थः । अग्निहोत्रहोमस्यद्रव्यसापेक्षत्वेनयवागूपाकस्यप्रतिपत्तिसापेक्षत्वेनाग्निहोत्रहोमेद्रव्यांतरकल्पनाप्रसंगात् यवागूपाकस्या
पूर्वार्थत्वकल्पनाप्रसंगाच्च वरंपूर्वंयवागूपाकःपश्चादग्निहोत्रहोमइति । एवंपंचमादिप्रश्नानांषष्ठप्रतिवचनादिसापेक्षत्वात्प्रथमतोवे
दपुरुषेणषष्ठप्रश्नप्रतिवचनानुवादःकृतइतिभावः ॥ एवमन्यत्रापीति ॥ भार्गववैदर्भ्यादिप्रश्नादिष्वित्यर्थः॥ तंचक्रममिति॥
सापेक्षत्वरूपार्थक्रमं । तत्रतत्र तत्तत्प्रश्नसंगतिकथनावसरइत्यर्थः ॥ किमितीति ॥ किंपप्रच्छेत्याकांक्षायामाहेत्यर्थः । ननुकु
तोनिमित्तकारणात्प्रजाजायंतइतिनिमित्तकारणप्रश्नस्यकिंबीजं कियंतिचकारणानि कानिचतत्पक्षेबाधकानि येनकुतःकस्मात्का
रणादितिप्रश्नःसंगच्छेतेत्यतस्तदेतत्सर्वंप्रदर्श्यप्रश्नार्थमाह ॥ ह्वाइत्युपक्रम्य सुप्रसिद्धं तौवादित्यादिना ॥ नचाचेतनैरे
वकारणै रुपपन्नमित्यन्वयः । तेष्वाविश्यस्वयमेवजनयतिचेत् प्राणादीनांपराधीनमपिजगत्कर्तृत्वंनस्यात् । जीवाधिष्ठितशरी
रवदित्यतः तान्निमित्तीकृत्येत्युक्तं । हेत्यस्यार्थःकिलेति किमितीति । किमुवाचेत्याकांक्षायामाहेत्यर्थः । प्रजाकामोहवैप्रजापति
रितिश्रुतौ आत्मनःप्रजाःदेवादीन् यत्किंचिदर्थंकामयतइत्यर्थःप्रतीयते नचासौयुक्तः । अद्यापिदेवादीनामनुत्पन्नत्वेनयत्किं
चित्प्रयोजनोद्देशेनतेषांकामनायोगादित्यतोव्याख्याति ॥ देवादिप्रजावत्त्वमात्मनइच्छन्नवर्ततेति ॥ ३ ॥ प्राणंमुख्यंचे
त्येतन्मिथुनमित्यन्वयः । रयिंप्राणमितिद्वितीयाप्रथमार्थे अत इतिकरणोपपत्तिः ॥ कथंतावुदपादयदितीति ॥ इत्याकांक्षा
यांतदभिप्रायमाहेत्यर्थः । रयिप्राणौममबहुविधाःप्रजाःकरिष्यतइतिमत्त्वातौसृष्ट्वास्वयंतूष्णीमासीनश्चेन्नस्वयंजगत्कारणंस्यात्प्र
जापतिरित्यतस्तदभिप्रायमाह ॥ एतौवाविश्येति ॥ रयिप्राणयोःसूर्याचंद्रमसोःप्रवेशमात्रकथनेनभगवतस्तौनिमित्तीकृत्यस्र

ष्टत्वंनलभ्यतइत्यसंगतिरित्यतोभाष्यानुसारेणश्रुतावध्याहरति ॥ एवंसूर्याचंद्रगतावि[३।१६]ति ॥ ४ ॥ वायुभारत्योःसृष्ट्यनंतरमे
वसूर्यादौप्रवेशस्यवक्तव्यतयासूर्याचंद्रगतौतौससर्जेत्यनुपपन्नमित्यतोयोजयति ॥ सूर्येति[३।१७] ॥ योऽयमिति[३।१७] ॥ वायुंसरस्वतींच
ससर्ज तदनंतरंसूर्यादिनामानौतौसूर्याचंद्रगतौससर्जचकारेतिससर्जेत्यस्यावृत्त्याभाष्यंव्याख्येयमित्यर्थः । तावाविश्येत्यादिकं
भाष्यमुपनिषद्यध्याहारकथनरूपमितिज्ञेयं । सूर्याचंद्रगतौससर्जेत्यनेनप्राणरय्योःस्वतएवसूर्याचंद्रमसोःप्रवेशप्रतीतिरपोढाभव
ति । रयिप्राणयोःसूर्याद्यधिष्ठानेनप्रजोत्पत्तिनिमित्तत्वस्योक्तत्वात्प्रकारांतरेणेत्युक्तं । वाइत्यस्यव्याख्यानंप्रमाणसिद्धमेतदिति ।
किंतत्सर्वमितिमूर्तिरेवरयिरित्यंतस्यावतारिका ॥ मूर्ततेजोबन्नलक्षणमिति[३।१८] ॥ मूर्तंसदितिसंप्रोक्तममूर्तमसदुच्यतइतिश्रुतौ
मूर्तामूर्तशब्दयोःसदसच्छब्दपर्यायत्वोक्त्यायदन्यद्वायोश्चांतरिक्षाच्चैतत्सदितिसच्छब्दस्यपंचभूतानांमध्येवाय्वंतरिक्षातिरिक्त
तेजोबन्नपरत्वकथनेन मूर्ततेजोबन्नलक्षणमितिव्याख्यातं । वाय्वंतरिक्षपरेणामूर्तशब्देनकारणप्रसंगात्तेजोबन्नव्यतिरिक्तकारण
त्वावच्छिन्नकारणमात्रंविवक्षितमितिभावेनाह ॥ अमूर्तंचप्रकृत्यादिकमिति[३।१९] ॥ यन्मूर्तंचेतियच्छब्दस्यतस्मादित्युत्तरतच्छ
ब्दान्वयंदर्शयति ॥ इतियदुपादानकारणराशिद्वयमिति[३।१९] ॥ तेजोबन्नलक्षणं तदतिरिक्तंप्रकृत्यादिकमितियद्राशिद्वयं त
स्मादित्यर्थः ॥ प्रविभक्ता[३।१९] यामूर्तिरिति ॥ प्रविभक्तेतिपंचम्यर्थकथनं । पंचमीविभक्तइतिसूत्रेणजात्यादिभिर्निर्धार्यमाण
स्यपृथक्करणेद्योत्येपंचमीस्यात् । यथाक्षत्रियाद्ब्राह्मणःपूज्यइत्यर्थकेनजातयाऽनयापंचम्याप्रकृतराशिद्वयमध्ये एकराशेःपृथक्कर
णरूपविभागबोधनात् । ततश्चमूर्तामूर्तराशिद्वयांतर्गतामूर्तभिन्नंमूर्तंरयिरितिश्रुत्यर्थोभवति । उपक्रमानुरोधान्मूर्तिरित्यस्यमूर्त

मितिव्याख्यानं । नन्वनेनसूत्रेणपंचमीनयुक्ता । निर्धार्यमाणस्यसामान्यशब्दोपात्तेनयत्रसामान्याकारेणापिअभेदोनास्ति तत्रै
वानेनपंचम्याविधानात् । यथामाधुराःपाटलिपुत्रेभ्यआढ्यतराइति गवांगोषुवाबहुक्षीराकृष्णेतिवन्निर्धार्यमाणस्योपादानराशि
द्वयात्सामान्याकारेणाभेदस्यैवविद्यमानत्वात् । यतश्चनिर्धारणमित्यनेनषष्ठीसप्तम्योरन्यतरस्याएवन्याय्यत्वादित्यस्वरसादाह ॥
[3|19] ससंम्यर्थेवापंचमीति ॥ तथाचतस्मान्मूर्तामूर्तरूपकारणसमुदायमध्येमूर्तिर्मूर्तं रयिः सरस्वत्यभिमन्यमानमित्यर्थउक्तोभव
ति । श्रुतौन्यूनतामाशंक्याह ॥ अमूर्तंप्राणइतिशेषइति । तस्मादित्येतदत्रापिसंबध्यते । अर्थस्तुपूर्ववदेव । समुदायार्थमाह ॥
[3|20] प्रकृत्यादिष्विति ॥ अमूर्तस्थःसवायुस्त्वित्यादिनाभाष्ये तस्मान्मूर्तिरेवरयिरित्यादिनाश्रुतौच रयिप्राणयोर्मूर्तादिस्थत्वकथन
मात्रमसंगतं । प्रजापतेःप्रजासर्गेतयोर्निमित्तत्वाप्रतिपादनादित्यत स्तावाविश्यस्वयंविष्णुःसर्वसृष्टीःकरोत्यजइत्येत दमूर्तस्थः
सवायुरित्यादावनुवृत्त्यायोज्यमित्याह ॥ तावाविश्येतिसर्वत्रसंबध्यतइति [3|21] ॥ सर्वत्र अत्र संवत्सरस्थोभगवानित्यादौ ।
भर्तृस्थःसस्वयंवायुरेवमित्यंतेसर्वत्रेत्यर्थः ॥ [3|21] आदित्योस्थित्वेति ॥ आदित्योहवैप्राणइत्यत्रेत्यर्थः ॥तत्कथमित्युच्यतइति [3|21] ॥
तत्कथमित्यतउच्यतइत्यर्थः । उक्तविवरणत्वेऽथशब्दोनुपपन्नइत्यतआह ॥ [4|1] अथशब्दइति ॥ सन्निधत्तइत्येतदंतर्णीतणिच्त्व
मित्यभिप्रेत्यसन्निवेशयतीत्युक्तं ॥ [4|13] इत्यादियोज्यमिति ॥ यत्प्रतीचींदिशंप्रविशतितेनप्रतीच्यान्प्राणान्स्वरश्मिषुसन्निधत्ते ।
यदधोदिशंप्रविशतितेनाधस्थान्प्राणान्स्वरश्मिषुसन्निधत्ते । यदूर्ध्वंप्रविशतितेनोर्ध्वस्थान्प्राणान्स्वरश्मिषुसन्निधत्ते । यदंतरादि
शःप्रविशतितेनांतरास्थान्प्राणान्स्वरश्मिषुसन्निधत्तइतियोज्यमित्यर्थः । आग्नेयादीनांदिशांअंतरादिशइत्यनेनग्रहणंकिंनस्यादि

त्यतआह॥ [४।३]अवांतरदिशामिति॥नन्वथादित्यउदयन्नित्यादिनोक्तमेवप्रमेयं यत्सर्वमित्यादिनापुनःकिमर्थमुच्यतइत्यतआह॥
[४।४]यत्सर्वमितिनिगमनमिति ॥ ५ ॥ अभिप्रायमाह ॥ [४।४]अनेनेति ॥ अथादित्यउदयन्नित्यादिनेत्यर्थः । अत्राशेषशब्देनवै
वक्षिकाशेषस्यविवक्षितत्वान्नातिप्रसंगः । प्रजाशब्देनकार्यंगृह्यते । घटाद्युत्पत्तिंप्रतिसौरालोकस्यापेक्षितत्वाद्विश्वरूपइत्यादेरथा
दित्यइत्यादेरिवप्रकृतोपपादकत्वेनोपयोगादर्शनात्प्राणमाहात्म्यांतरोपपादकत्वेनोपयोगंदर्शयति ॥ [४।५]नकेवलमिति ॥ यद्वासू
र्येस्थितस्यप्रजोत्पत्तिनिमित्तत्वमुक्त्वा सएषवैश्वानरइतिवाक्येऽग्निस्थस्याप्युच्यतइतिप्रतीयते ऽतःपूर्वानुवादेनैतद्वाक्यमवतार्य
व्याचष्टे ॥ [४।४]अनेनेति ॥ सूर्यस्थत्वस्यैवप्रतिज्ञानादुदाहरिष्यमाणमंत्रेप्येवमेवप्रतीतेरित्यर्थः । विश्वनरसंबंधीत्यस्यविवरणं ता
पनेत्यादि ॥ [४।८]जातस्येति ॥ विद्यमानस्येत्यर्थः । प्राणोवैजातवेदाःसहिजातानावेदेतिबृहद्ब्राह्मणवाक्यादेवंनिर्वचनं ॥ [४।९]उपल
क्षणंचैतदिति ॥ तापिनीपाचिकाचैवशोषिणीचप्रकाशिनीत्युक्तत्वादितिभावः । संनयेदितिविध्यनुपयोगमाशंक्याह ॥ सन्नि
[४।११]वेशयतीत्यर्थइति ॥ केतेप्राच्यादयःप्राणाइतीत्यनंतरमाकांक्षायामितिशेषः । सभार्याइत्येतत्तृतीयांततयाविपरिणम्यकोणपै
रित्यनेनापिसंबध्यते । तथाचदिशिदिशिचत्वारइत्येतदुपपद्यतइत्यभिप्रेत्याह ॥ [४।१३]सभार्यैरग्न्यादिभिःकोणपैरिति ॥ इंद्र
यम वरुण सोमाः सभार्याःसभार्यैरग्न्यादिकोणपैःसार्धं शेषमित्रौ वींद्रकामा वित्येतेसभार्यादिशिदिशि प्राच्यादिदिक्षु अधऊ
र्ध्वंच चत्वारोवर्ततइतिभाष्यवाक्यार्थः ॥ [४।१३]एतदिति ॥ कोणपैःसार्धमित्येतदित्यर्थः । सभार्याइत्येव यदधइत्यादौसंबध्यतइ
त्यन्वयः ॥ [४।१४]केचिज्ज्ञातव्याइति ॥ अत्रभाष्येप्रमाणांतरेचदिङ्मध्याभिमानिनामनुक्तत्वात्केचिज्ज्ञातव्याइत्येवोक्तमितिकेचि

दाहुः । विनायकःविवस्वान्नामासूर्यःएतत्पद्वयौचेतिसंप्रदायइत्यपरे ॥ ६ ॥ अधिष्ठायेत्यनंतरंप्रजापतिःप्रजाःसृजतीतीतिशेषः । प्रजाकारणत्वंप्रजोत्पत्तिकर्तृत्वमितिवार्थः । इतिप्रसिद्धमितिवैशब्दार्थकथनं । सूर्यगतिविशेषोपलक्षितौ दक्षिणोत्तरदेशयोःसूर्यगमनविशेषेणोपलक्षितौव्यावर्तितौ । देवयानपितृयाणदेवताविशेषाभिमतौ देवयानपितृयाणसंज्ञकमार्गद्वयाभिमानिदेवताविशेषाभिमन्यमानौ । भागविशेषौ अंशविशेषौ ॥ कुतएतदित्युच्यतइति ॥ एतत् रयिप्राणयोर्भागविशेषाधिष्ठातृत्वं कुतःप्रतिपत्तव्यमित्याकांक्षायांतद्यइत्याद्युच्यतइत्यर्थः ॥ अनुतिष्ठंतीति ॥ कुर्वंतीत्यर्थः । इष्टापूर्तादिकर्तारःप्रथमतएवचांद्रमसंलोकंप्राप्नुवंतीतिभ्रांतिनिरासाय वक्ष्यमाणंदक्षिणमित्येतदादौयोजयति ॥ तएतेदक्षिणंपितृयाणमिति ॥ अनेनधूमो रात्रिस्तथाकृष्णःषण्मासादक्षिणायनमितिगीतोक्तमुपलक्षितंभवति ॥ चांद्रमसमेवेति ॥ कर्मिणोज्ञानिवच्चंद्रलोकप्राप्त्यनंतरं वैश्वानरादिलोकंनप्राप्नुवंतीत्यर्थः । पूर्ववाक्यार्थं एषवैरयिर्यःपितृयाणइत्यत्रहेतुतयायोजयन्यदित्येतद्यतइत्यर्थकमितिव्याख्याति ॥ यतएवमिति ॥ गम्यस्यैवस्वप्राप्तिमार्गतदभिमानिदेवतासाम्यस्यवक्तव्यत्वात् । चंद्रांतर्गतसरस्वत्याःस्वप्राप्तिहेतुभूत पितृयाणनामकमार्गाधिष्ठातृदक्षिणायनाभिमानिदेवतामधिष्ठाय तन्नियंतृत्वेवक्तव्ये तदभिमन्यमानदक्षिणायननियंतृत्वमपि वाच्यमितितदधिष्ठातृत्वंसेत्स्यतीतिभावः ॥ ७ ॥ उत्तरेणेति ॥ उत्तरायणेनमार्गेण देवयानेनेत्यर्थः । एतदित्युत्तरत्रानुवादादाह ॥ ततश्चपरमंब्रह्मेति ॥ प्राणानामायतनत्वादिकमेतस्मान्नपुनरावर्ततइत्यत्रहेतुतयोक्तमित्यभिप्रेत्ययोजयति ॥ यस्मादिति ॥ एतद्वाइत्यत्रविद्यमानोवैशब्दोवधारणार्थइत्यभिप्रेत्याह ॥ एतद्वै देवयानेनप्राप्यंपरंब्रह्मैवेति ॥ इतीत्यनूद्यत

स्मादितिव्याख्यातं । तस्यैवविवरणं ॥ अपुनरावृ[५।१७]त्त्ययोग्यानांमार्गनिरोधकत्वादेवेति ॥ निरोधोऽविदुषामितिच्छंदोग श्रुतिवाक्यं । एषवैरयिर्यःपितृयाणइतिवत् । एषवैप्राणोयोदेवयानइति एषनिरोधइत्यनंतरंश्रुतौवक्तव्यस्यानुक्तेर्न्यूनतामाशंक्य पूर्ववाक्यार्थस्याध्याहरिष्यमाणवाक्यार्थेहेतुतामभिप्रेत्य हेतुहेतुमद्भावंव्यंजयन्अध्याहरति ॥ [५।१७]येतंएवमिति ॥ गम्यस्यैवस्व प्राप्तिमार्गतदभिमानिदेवतास्वाम्यस्यवक्तव्यत्वादादित्यांतर्गतप्राणस्य स्वप्राप्तिहेतुभूतदेवयाननामकमार्गाधिष्ठात्रुत्तरायणाभिमा निदेवतामधिष्ठायतन्नियंतृत्वेवक्तव्येतदभिमन्यमानउत्तरायणनियंतृत्वमपिवाच्यमितितदधिष्ठातृत्वंसेत्स्यतीतिभावः । उक्तव क्ष्यमाणश्रुत्योर्विषयभेदप्रदर्शनायोक्तमनूद्य तदेषइतिवाक्यंगृहीत्वाव्याचष्टे ॥ [५।१८]आदित्यमित्यादिना ॥ अंशाःप्रतिबिंबाः रू पाणिप्रतिमाः । सूर्यरथस्य सप्तयुंजंतिरथमेकचक्रमितिएकचक्रत्वात्सप्तचक्रइत्येतत्सप्तचक्राणीत्यादिनान्यथाव्याख्यातं । पुरी षिणमितिविशेषणाद्दक्षिणाश्रितभागइतिसिध्यति ॥ ८ ॥ संवत्सरोवैप्रजापतिरित्युक्तत्वात्तत्समुच्चयार्थंकिंचेत्युक्तं ॥ [५।१७]कुतंएत दिति ॥ रयिप्राणयोःकृष्णशुक्लपक्षस्थितत्वंकस्मात्प्रमाणात्प्रतिपत्तव्यमित्यर्थः । रयिप्राणयोःकृष्णशुक्लपक्षस्थितत्वस्य(साध्य त्व)लाभायतस्मादेतइत्यत्रैवकारमध्याहृत्यव्याख्याति ॥ [५।१८]तस्मादेवहीति ॥ मासोहवैप्रजापतिरित्युक्तत्वात्किंचेत्युक्तं । नकेव लमेतावदितितस्यार्थः ॥ [६।१]पूर्ववद्व्याख्येयमिति ॥ अहोरात्रकालमधिष्ठायप्रजापतिःप्रजाःसृजति । तस्यावयवभूतमहरेवप्राणो रात्रिरेवरयिः । अहोरात्राख्यभागद्वयेस्थित्वाप्रजापतेःप्रजोत्पत्तौनिमित्तीभवतइतियावदितिपूर्ववदित्यर्थः । ननुश्रुतौ संवत्स रोवै मासोवै इत्यादिप्रथमांतोपक्रमादहोरात्रमितिप्रथमांतेवक्तव्ये कथंसप्तमीनिर्देशइत्यतआह ॥ [६।१]एकवद्भावस्येति ॥ अयं

भावः । श्रुतावहोरात्रेइतिइतरेतरयोगद्वंद्वाश्रयणेनप्रथमाद्विवचनमेव । एकवद्भावस्य सर्वोद्वंद्वोविभाषयैकवद्भवतीतिपरिभाषयावैकल्पिकत्वादिति । एवमेवभाष्येप्रथमाद्विवचनमितिनभ्रमितव्यमित्याह ॥ [६।२] भाष्येत्विति ॥ एकवद्भावेनाहोरात्रइतिसप्तम्येकवचनमेव । अह्निनिशीतिसप्तम्यंतप्रायपाठादित्यर्थः । ननुदंपत्योर्भगवान्विष्णुर्भार्यास्थातुसरस्वती । भर्तृस्थःसस्वयंवायुरितिभाष्यमुपनिषदर्थाप्रतिपादकत्वादसंगतमितिप्रतीतिंवारयितुंसंगमयति ॥ [६।२] प्राणंवाइत्यादिवाक्यमिति ॥ [६।२] नसाक्षात्प्रकृतेनेति ॥ प्राणस्याहरभिमानित्वकथनेनसरस्वत्यारात्रिस्वामित्वकथनेनचसाक्षात्संबंधाभावादितिभावः । नसंबध्यतइत्यनंतरमतइतिशेषः ॥ [६।३] एवंसतीति ॥ अहोरात्राभिमानिप्राणसरस्वत्योर्भर्तृभार्यादेवतात्वेसतीत्यर्थः । तदुपपादकत्वेन अहोरात्राधिष्ठातृप्राणसरस्वत्योर्भर्तृभार्यादेवतात्वोपपादकत्वेन । अस्य प्राणंवाएतेप्रस्कंदंतीत्यादिवाक्यस्येत्यर्थः । तदुपपादकत्वप्रकारं दर्शयति ॥ [६।३] येदिवारत्येति ॥ ननुयद्दिवास्त्रीसंगस्यायोग्यदेशेमुख्यप्राणनिर्यापनप्रत्यवायहेतुत्वं यच्चरात्रौस्त्रीसंगस्यब्रह्मचर्यसमपुण्यापादकत्वं तदन्यथानुपपत्त्याप्राणसरस्वत्योर्नसाक्षादहोरात्रगतत्वंसेत्स्यति । किंनाम भर्तृभार्यागतत्वमेवेतियदुक्तं तदयुक्तं । वाक्प्राणयोःस्त्रीपुरुषस्थितत्वस्योक्तप्रमेयोपपादकत्वेसत्येवतत्सिद्ध्येत् । नचतदस्ति । तयोःसर्वदास्त्रीपुरुषयोःसन्निधानात् । दिवासंगस्यापिपापापादकत्वायोगात् । एवमपिपापहेतुत्वेरात्रावपितत्प्रसंगेनब्रह्मचर्यसाम्यानुपपत्तेश्च । किंच प्राणस्यपुंस्थितत्वमात्रेणाहरधिष्ठातृत्वं भारत्याश्चस्त्रीगतत्वमात्रेणरात्र्यधिष्ठातृत्वंकथंसिद्ध्येदित्यतोभिप्रायमाविष्करोति ॥ [६।५] तथाहीत्यादिना ॥ नवयंप्राणंप्रस्कंदंतीत्याद्युपपत्त्यातयोर्दंपतीगतत्वमात्रंब्रूमः । किंतुतत्तत्कालेतत्रतत्रविशेषतःसन्निधानंच । यस्मादहर

धिष्ठाताप्राणःपुंसिवर्तते तस्मादेवसस्वाभिमन्यमानेकालेतत्रविशेषतःसन्निधत्ते । यस्माद्रात्र्यधिष्ठात्रीरयिःस्त्रियांवर्तते तस्मादेवसा स्वाभिमन्यमानेकालेतत्रविशेषतःसन्निधत्तइति । अतोनकाचिदनुपपत्तिरितिभावः । रात्रौस्त्रियांसरस्वत्यायावदधिकंसन्निधानंतदनुगुणंपुरुषेप्राणस्यापिसन्निधानंविद्यते । दिवातुप्राणस्यपुंसिततोप्यधिकंसन्निधानमित्यतउक्तमुपपद्यते ॥ ९ ॥ एकेनप्रकारेणोपादानत्वस्ययन्मूर्तंचेत्यादावुक्तत्वादन्नंवाइत्येतत्किंचेत्यवतारितं । प्रजाजनकत्वमितीत्यनंतरं आकांक्षायामाहेतिशेषः । पितामहादिवत्परंपरयाजनकत्वोपचारइतिप्रतीतिनिरासायाह ॥ अन्नेस्थित्वे[६।१८]त्यादि ॥ चरंतिजा[६।१०]नंतीति ॥ चरगतिभक्षणयोरितिधातुव्याख्यानाद्गत्यर्थानामवगत्यर्थत्वमितिभावः । मिथुनोत्पादनस्याज्ञानिसाधारण्यादाह ॥ [६।११]साध्वपत्याइति ॥ तेषामेवैषइत्यादिवाक्यद्वयंभिन्नविषयत्वप्रतीतिनिरासायव्याचष्टे ॥ ते[६।१२]षामेवैषइति ॥ प्रतिष्ठितमित्यत्रप्रतिशब्दार्थोनियमेनेति । मायाचेत्यत्रचशब्दस्यानुक्तसमुच्चायकत्वमभिप्रेत्याह ॥ [६।१३]एवमादिदोषाइति ॥ १० ॥ ७ ॥ इतिप्रथमप्रश्नप्रतिवचनं ॥ १ ॥ [६।१४]अथहैनंभार्गवः ॥ ननुकात्यायनप्रश्नप्रतिवचनानंतरंसुकेशादिप्रश्नप्रतिवचनानिविहायभार्गवप्रश्नप्रतिवचनेकुतोवक्तव्ये इत्याशंकापरिहारायोक्तमथशब्दंव्याचष्टे ॥ प्रश्नार्थस्योक्तानंतर्य[६।१५]सूचकोथशब्दइति ॥ स्थित्यादीत्यतःपरं संभवतीतिशेषः । तदनंतरं सृष्टिकथनानंतरं ॥ स्थिति[६।१५]ज्ञानहेतुत्वमिति ॥ स्थितिहेतुत्वंज्ञानहेतुत्वंचेत्यर्थः । अतएवप्राक्स्थित्यादीत्युक्तं [६।१६]अभिप्रेतमिति ॥ समिथुनमुत्पादयतइतिप्रथममुत्पत्तिकथनेनैतौमेबहुधाप्रजाःकरिष्यतइतिप्रजापतेस्तपःप्रकारप्रदर्शकवाक्येबहुधाप्रजाकरणवचनेनवा प्राणस्यवरिष्ठत्वमभिप्रेतमित्यर्थः ॥ कत्येवकियत्सं[६।१६]ख्याकाइति ॥ किमःसंख्यापरिमाणेडतिचेतिसूत्रेण

किंशब्दात्संख्यापरिमाणविशेषप्रश्नार्थाड्डुतिप्रत्ययविधानादितिभावः ॥ कतरेचेति ॥ केचदेवाइत्यर्थः । किंयत्तदोर्निर्धारणे द्वयोरेकस्यडतरजितिसूत्रेणकिंशब्दान्निर्धारणार्थेडतरच्प्रत्ययइतिभावः । विषयजातं शब्दादिसमूहं । ननुपरंब्रह्मान्वेषमाणाइत्युक्तत्वात्परब्रह्मजिज्ञासुनाभार्गवेणधारकादिदेवताविषयकप्रश्नःकथंक्रियतइत्यतः प्रश्नतात्पर्यमाह ॥ कान्निमित्तीकृत्येति ॥ एतावदेवाहमेतद्ब्रह्मवेदेत्युपसंहारवाक्येन परिहारवाक्यस्यापिभगवद्विषयकत्वावगमाच्चैतदेवप्रश्नतात्पर्यमित्यवधेयं । अतएवपूर्वखंडेपि तावाविश्यस्वयंविष्णुःसर्वसृष्टीःकरोत्यजइतिभाष्येप्रश्नतात्पर्यमुक्तं ॥ अतिशयेनैववरइति ॥ वरशब्दादतिशयार्थेअतिशायनेतमबिष्ठनावितिइष्ठन्प्रत्ययइत्यर्थः ॥ १ ॥ ननुकःपुनरेषांवरिष्ठइतिवरिष्ठत्वमनूद्यते नचासिद्धस्यानुवादोभवतीत्यतः प्रागुक्तरीत्यामुख्यप्राणस्यवरिष्ठत्वंसिद्धवत्कृत्यप्रकारप्रश्नएव नतुवरिष्ठस्वरूपप्रश्नइतिप्रश्नाभिप्रायमाह ॥ पूर्वोक्तरीत्येति ॥ पूर्वखंडेमुख्यप्राणस्याशेषप्रजोत्पत्तौमुख्यद्वारत्वमुक्तं । अतः स्थित्यादावपिसएवमुख्यहेतुरितिवाच्यं । यतोमहाराजत्वमिवयुवराजत्वमपिअखंडंलोकेदृश्यते । तत्र किंप्रमाणकं किंप्रकारकंवा वरिष्ठत्वमितिप्रश्नार्थः । यथाश्रुते प्रश्नस्यसिद्धार्थत्वप्रसंगात्परिहारानानुगुण्याच्चेतिभावः ॥ एषआकाशाभिमानीति ॥ आकाशइत्यस्यव्याख्याआकाशाभिमानीति । यस्त्वयाधारकः पृष्टएषआकाशाभिमानीदेवोहवाइत्यन्वयः ॥ एवंवायुरग्निरित्यादीति ॥ यस्त्वयाधारकःपृष्टःसवायुरग्निरित्यादि । तथाप्रकाशहेतुत्वेनयःपृष्टःसमनश्चक्षुरादीति योजनीयमित्यर्थः । ननुचतुर्थखंडे धारकाणांप्रकाशकानांचबहूनांवक्ष्यमाणत्वात् नवानामेवात्रकथंकथनमित्यतआह ॥ अत्रोपलक्षणत्वेनेति ॥ आकाशादिभूतवाचकशब्दपंचकेनपंचतन्मात्राः वाक्शब्देनकर्मे

द्रियाणितद्विषयाश्च चक्षुःश्रोत्रमनःशब्दैर्ज्ञानेंद्रियाणितद्विषयाः तत्रदेवाकाशादिसर्वधारकोमुख्यप्राणश्चेत्येतेसर्वेपितत्त्वदेवाइ त्यर्थः । धारकाणांप्रकाशकानांचसंकलय्योक्तेस्तत्रविवेकमाह ॥ तेषु[७।३]चक्षुरादयइति ॥ चक्षुश्चद्रष्टव्यंचेतिचक्षुषएवादावुत्तर त्रोक्तेश्चक्षुरादयइत्युक्तं । अन्येपृथिव्यादयः । लक्षणाहेतुंमुख्यार्थानुपपत्तिंदर्शयति ॥ उक्त[७।३]मात्रग्रहणइति ॥ कःपुनरेषां वरिष्ठइतिप्रश्नाननुगुणःपरिहारःस्यादिति ॥ एषांधारकाणांप्रकाशकानांचतत्त्वाभिमानिनांसर्वेषांमध्येकोवावरिष्ठइतिप्रश्न स्य तान्वरिष्ठःप्राणउवाचेतिपरिहारोननुगुणःस्यात् । उक्तानामाकाशादीनांनवानांदेवानांमध्येमुख्यप्राणस्यानुक्तत्वेनतदपेक्षया वरिष्ठत्वकथनस्यानन्वितत्वात् । तस्मात्प्रश्नप्रतिवचनानुगुण्यायोक्तेषुप्राणोऽवश्यंलक्षणीयः । तथाच किमर्धजरतीयन्यायेन प्राणावसितसर्वदेवोत्तमत्वलाभायलक्षणयावक्ष्यमाणसर्वतत्त्वदेवानांग्रहणे तन्मध्येमुख्यप्राणस्यवरिष्ठत्वेन कःपुनरेषांवरिष्ठइति निर्धारणषष्ठ्याःसंभवेन चतुर्थप्रश्नेवक्ष्यमाणसर्वदेवानांग्रहणंयुक्तमित्यर्थः॥ तत्रे[७।४]ति ॥ उपलक्षणयासर्वदेवानांग्रहणेसतीत्यर्थः । ननुयस्यवक्तव्यत्वंसएवगृह्यतामित्यतआह ॥ उभ[७।४]योरपीति ॥ वचनवृत्त्योभयोर्ग्रहणेवक्ष्यमाणबाधकप्राप्त्याएकस्यैववचन वृत्त्याग्रहणेकर्तव्येकोवावचनवृत्त्याग्राह्यइतिचिंतायामित्यर्थः । वायुरग्निरित्यत्रभूतवायुरुच्यतइतिमूले हेतोरनुक्त्यान्यूनतेत्यतो मूलाभिप्रेतंहेतुमाह ॥ भूत[७।५]प्रकरणत्वादितिभावइति ॥ यथाहजैमिनिः विशयेप्रायदर्शनादिति । वत्समालभेतेत्यत्रालंभनं हिंसोतस्पर्शइतिविशये गोदोहनप्रकरणात्स्पर्शएवेति । ननुप्राणशब्देनप्रधानवायुरुच्यतइत्युत्तरभाष्यंव्यर्थं । तान्वरिष्ठःप्राणउ वाचेत्यत्रवरिष्ठत्वविशेषणादेवप्राणशब्दस्यप्रधानवायुपरत्वनिश्चयेन पूर्वत्रवायुशब्दइवसंदेहाभावेन प्राणशब्दस्याव्याख्येयत्वा

दित्याशंक्य नेदंभाष्यंप्राणशब्दस्यव्याख्यानार्थंप्रवृत्तं येनोक्तदोषःस्यात् । किंतुपूर्वत्रवायुशब्देनभूतवायुरुच्यते भूतप्रकरणत्वादित्युक्तं । तत्रप्रकरणमुल्लंघ्यवायुशब्देनप्रधानवायोरेवग्रहणेबाधकंदर्शयितुमितिभावेन तद्भाष्यमवतारयति ॥ वायाविंद्र इत्यादाविवेति ॥ भूतेषुतच्छ्रुतेरित्यधिकरणे । आकाशादिभूतेषुदेवानांलयकथनावसरे वायाविंद्रःसोमआदित्योबृहस्पतिरित्यादिवाक्ये इंद्रादिलयाधिकरणत्वेनलिंगेन भूतप्रकरणंबाधित्वा वायुशब्देनभूतवायुंपरित्यज्य यथामुख्यवायुर्गृह्यते । तद्वदत्रापिभूतप्रकरणंबाधित्वा वायुशब्देनप्रधानवायुःकिंनगृह्यतइत्यर्थः । ननुभूताभूतसाधारणोयःशब्दोभूतप्रकरणेश्रूयतेसभूतपरएव । यःसाधारणःशब्दोयत्प्रकरणेपठ्यतेसतत्परइतिव्याप्तेः । वायुशब्दस्यप्रधानवायुपरत्वेनव्यभिचारचोदनंनयुक्तं । भूतेषुतच्छ्रुतेरित्येतद्विवरणात्मके नैकस्मिन्दर्शयतोहीत्यत्रसूत्रे उदाहृतस्यास्यवाक्यस्यभूतपरत्वेन प्रधानवायोरपिभूतत्वस्यैवांगीकर्तव्यत्वात् । अतएव प्रधानवायुस्त्विहभूतनामेत्याद्यनुव्याख्यानेप्रधानवायोर्भूतत्वमुक्तं । तस्मादत्रापिवायुशब्दस्यभूतपरत्वात्कथंव्यभिचारः । पूर्वंप्रधानवायुव्यावृत्त्यर्थंभूतप्रकरणत्वादितिहेतूक्तिश्चायुक्तेतिचेन्न । भूतप्रकरणेश्रुतोवायुशब्दःखंवायुर्ज्योतिरापः आकाशाद्वायुरित्यादौनियमेनावांतराभिमानिपरएवदृश्यते । अतोत्रापिसएवोच्यते । नप्रधानवायुरित्याशयेनोक्तावियमाशंकोदेतीत्यंगीकारात् । नन्वत्रप्रधानवायुपरत्वज्ञापकाभावेसतीतिविशेषणमभिप्रेतं । वायाविंद्रइत्यत्रतुइंद्रलयाधिकरणत्वंज्ञापकमस्तीति विशेषणाभावान्नव्यभिचारइत्यतआह ॥ तस्यापिवक्तव्यत्वादिति ॥ तर्ह्यवश्यवक्तव्यत्वंमुख्यपरत्वज्ञापकमत्राप्यस्तीतिविशेषणासिद्धिरितिभावः । केचित्तु तत्रालिंगवदत्रप्रकरणबाधकंकिमित्यतआह ॥ तस्यापीति ॥ तस्याप्यव

श्यवक्तव्यत्वान्यथानुपपत्त्याप्रकरणबाधोयुक्तइतिव्याचक्षते । प्राणशब्देनप्रधानवायुरित्यत्रोच्यतइत्यनुवृत्तौसत्यांनैतच्छंकापरि
हारकमेतद्वाक्यंस्यादतोऽध्याहृत्ययोजयति ॥ [७।६] तान्वरिष्ठइति ॥ ततश्चैवंभाष्याशयः । मुख्यप्राणस्याकाशोहवाएषदेवइति
धारकप्रकाशकदेवप्रतिपादकवाक्येऽनुक्तौधारकत्वप्रकाशकत्वाप्रसक्तेः तान्वरिष्ठःप्राणउवाचेत्यत्रधारकप्रकाशकैर्धारणप्रकाशन
विषयेविवादकरणासंभवेन कःपुनरेषांवरिष्ठइतिनिर्धारणषष्ठीबलेनच पूर्वोक्तएवप्राणोऽत्रवरिष्ठत्वावधारणायपरामृश्यतइतिवा
च्यं । यदिसवायुशब्देनोक्तःस्यान्नतर्हिप्राणशब्देनपरामृश्येत। शब्दांतरेणप्रस्तुतस्यशब्दांतरेणपरामर्शस्यबाधकंविनाऽदर्शनात् ।
तथाचप्राणशब्देनपरामर्शानुपपत्त्या प्रतिहतशक्तिकमवश्यवक्तव्यत्वं वायुशब्दस्यप्रधानवायुपरत्वमवगमयितुंनालमिति । के
चित्तु वरिष्ठःप्राणउवाचेति सिद्धवन्निर्देशेनैवपरामर्शइतिज्ञायतइत्याहुः । शंकते [७।६] यद्यत्रेति ॥ वायुशब्देनाप्रकृतत्वेतद्वाच
कपदांतराश्रवणात्प्रकृतत्वमेवनस्यात् । तथाचाप्रकृतपरामर्शादर्शनात्प्राणपदेनपरामर्शएवनस्यादिति प्रतितर्कविरुद्धशक्तिस्तर्को
नपरबाधनायालमितिभावः । ननुक्वचिद्बुद्धिप्रकृतस्यापिपरामर्शोदृश्यते । तत्कथमेतदित्यतआह ॥ [७।७] नहीति ॥ उत्तरमाह ॥
[७।७] लक्षणयापीति॥ नहिशक्त्यैवप्रकृततयाभवितव्यमितिनियमः । तस्माएतत्प्रोवाच । अन्नंप्राणंचक्षुःश्रोत्रंमनोवाचमितीत्यादौ
लक्षणयागृहीतानामपिचक्षुरादीनांपरामर्शदर्शनादितिभावः । यद्यत्रासौवायुशब्देनप्रकृतःस्यादितिनञ्विनाकृतपाठःक्वचिद्दृश्य
ते । तस्यैवंयोजना । नह्यप्रकृतस्यपरामर्शोयुज्यतइति पूर्वं वायुशब्देनप्रकृतःप्रधानवायुःप्राणशब्देनपरामृश्यतेइतिवक्तव्यं ।
नचतथायुज्यते । कुतइत्यतउक्तं ॥ [७।६] यदीति ॥ यद्यसौप्राणः अत्रपूर्ववाक्ये वायुशब्देनप्रकृतःस्यात् । कथंतर्हिप्राणशब्देनपरा

मृश्येत । शब्दांतरेणप्रकृतस्यशब्दांतरेणपरामर्शस्यादर्शनेनायोगात् । नन्वात्मनआकाशःसंभूतइत्यत्र ब्रह्मशब्दोदितेतस्मिन्ना त्मशब्दंप्रयुज्यचेत्यनुव्याख्यानोक्तरीत्या ब्रह्मविदाप्नोतिपरमितिब्रह्मशब्देनप्रकृतस्यात्मशब्देनपरामर्शस्य सवाएषइत्यन्यप्रारंभा दितिभाष्योक्तरीत्या आत्मशब्दोदितस्यपुरुषशब्देन सवाएषपुरुषोन्नरसमयइतिपरामर्शस्यचदर्शनात् । कथंशब्दांतरेणप्रकृत स्यशब्दांतरेणपरामर्शोनोपलभ्यतइत्यतउक्तं॥ नह्येवं[७।६]बाधकमंतरेणेति ॥ एवं शब्दांतरेणप्रकृतस्यशब्दांतरेणग्रहणं। अग्रहणे बाधकमंतरेणकुत्रचिदुपलब्धं । येनात्रवायुशब्देनप्रकृतस्यप्राणशब्देनग्रहणंयुज्येत । अग्रहणेपिबाधकाभावात् । आत्मशब्देना परामर्शेउत्तरवाक्यस्यपूर्ववाक्यप्रपंचकत्वानुपपत्तिरूपबाधकसत्त्वात् ब्रह्मशब्दोदितस्यापिआत्मशब्देनपरामर्शोभ्युपगतः । पु रुषादिशब्देतुरसशब्देनविशेषणादिकंबाधकमित्यर्थः । नन्वप्रसक्तपरामर्शायोगेनप्रधानवायोरपिप्रागवश्यंवक्तव्यत्वमत्रापिबाध कमित्यतआह ॥ [७।७]लक्षणयापीति ॥ तस्यमुख्यवायोः ॥ [७।७]ग्रहणसंभवादिति ॥ नन्वेवंवायाविंद्रइत्यादाविवात्रबाधकाभावा द्भूतप्रकरणत्वेनलिंगेनभूतवायुरुच्यतांनाम । तथापिमुख्यवायावपि (वायुशब्द)मुख्यवृत्तिसद्भावात्तांपरित्यज्यतस्यप्रकृतत्वला भायजघन्यवृत्त्यंगीकारोजघन्यः । सुरसरितिनिवसतःपुरुषस्यजललाभार्थंकूपखननन्यायसाम्यादित्याशंक्यपरिहरति ॥ [७।८]नच वाच्यमिति ॥ [७।८]उक्तादेवेति ॥ वायुशब्देनप्रकृतत्वेप्राणशब्देननपरामृश्येतेत्युक्तादेवहेतोरित्यर्थः । बाधकेसतिमुख्यंपरित्य ज्यजघन्यवृत्त्यंगीकारोयुक्तएव । तस्यांतेशुषिरंसूक्ष्ममित्यत्रसर्वपदवाच्येपिब्रह्मणिशुषिरपदलक्षणायादृष्टत्वादितिभावः । ननु बाधकेसतिशब्दांतरेणप्रस्तुतस्यशब्दांतरेणपरामर्शोस्ति । अत्रापिपरामर्शान्यथानुपपत्त्यापूर्वप्रकृतत्वेवाच्ये लक्षणयाचतदंगी

कारे वृत्तिद्वयमंगीकरणीयमितिगौरवमेवबाधकमस्ति । तस्माद्भूतेक्तृप्तयाशक्त्यैव मुख्योप्युच्यतइत्यंगीकरणमेववरमित्याशंक्य विपक्षेततोपिगौरवमाह ॥ [७।८] नह्येवमिति ॥ वाचकत्वांगीकारेपीत्यर्थः । यथानानार्थेषुगवादिशब्देषुघटत्वपृथिवीत्वादिप्रवृत्ति निमित्तनानात्वेनशक्तिरपिनाना । तथाभूतेवायौमुख्येचशक्तिर्भिन्नैवेत्यंगीकर्तव्यं । धारणप्रकाशनहेतुतयाक्तृप्ताशेषतत्त्ववदेवोप लक्षणंचकार्यं । एवंचवृत्तित्रयमंगीकार्यमितिलक्षणामनंगीकुर्वन्चोरभयाद्धोरमृगाकीर्णगहनंवनंप्रविष्टइवापद्यते । तस्माद्वक्ष्य माणतत्तद्देवतात्वावच्छेदेनलक्षणायांतत्रप्राणस्यापिप्रविष्टत्वेनसोपितयैवगृह्यतइतिनतदर्थंपुनःप्रयत्नांतरमितिलक्षणापक्षएवलाघ वमितिभावः ॥ [७।८] येनेति ॥ सकृदुच्चरितशब्दस्यसकृदेवार्थप्रत्यायकत्वनियमात् । शब्दश्रवणानंतरंतत्तदर्थशक्तिस्मरणस्यक्रमिक त्वेनैकदाअनेकार्थस्मरणानुपपत्तेरितिभावः ॥ [७।९] एतेषांचेति ॥ वाय्वादीनांदेवानांमध्यइत्यर्थः ॥ तएते[७।९]धारकाइति ॥ अयंत च्छब्दःपूर्वोक्तधारकपरामर्शकः । नतुप्राकाश्यविशेषणमितिभावः । अतएवसमुच्चायकःचशब्दोप्यध्याहृतः । प्राकाश्यशब्दस्य प्रकाशकाइतिकथंव्याख्याइत्याशंक्यण्यत्प्रत्ययोयंप्रकाशशब्दान्मत्वर्थेइतिभावेनाह ॥ [७।१०] प्राकाश्याःप्रकाशवंतइति ॥ प्रकाश जनकाइत्यर्थः । संसर्गेस्तिविवक्षायांभवंतिमतुबादयइत्युक्तेर्जन्यजनकभावलक्षणसंसर्गोत्रविवक्षितइतिभावः । यद्वा तइतित च्छब्दःपूर्वोक्तानांधारकाणांप्रकाशकानांचोभयेषांपरामर्शकइत्यभिप्रेत्य तएतेधारकाःप्रकाशकाश्चदेवाइत्युक्तं । तर्हिप्राकाश्याइत्य धिकमित्याशंक्यतच्छब्दोक्तानांतेषांविशेषणमित्यभिप्रेत्यप्राकाश्याःप्रकाशवंतइतिव्याख्यातं । ननुतेधारकाःप्रकाशकाश्चदेवावदं तिअवदन्नित्येववक्तव्येप्राकाश्याःप्रकाशवंतः अभिअभितइत्यनयोःक्वोपयोगः । अर्थविशेषालाभादित्यतस्तयोस्तात्पर्यमाह ॥

उच्चैरितियावंदित्यादि ॥ लङर्थस्यबाधात्अवदन्नित्युक्तं । अभिवदंतीत्यत्राभिशब्दस्याव्ययत्वेनानेकार्थत्वमभिप्रेत्याभिउच्चैरितियावदित्युक्तमितिकेचित् । अत्राभिउच्चैरितिक्वचित्पाठः ॥ बाणंशरीरमिति ॥ शांतिंनिर्वाणपरमामित्यादौनिर्वाणशब्दस्यप्राकृतशरीरराहित्येननिमित्तेनमोक्षेप्रयोगात्वबयोरभेदेनबाणशब्दोपिशरीरवाचीत्यर्थः । वयमेतद्बाणमितिसामान्येनोक्तस्यबहुवचनस्यविविच्येतरप्रतिषेधपूर्वकंतात्पर्यमाह ॥ अहमेवस्वातंत्र्येणेति ॥ २ ॥ मन्यमानानिति ॥ अहंकारंकुर्वतइत्यर्थः ॥ प्राणादिरूपैरिति ॥ वागादिरूपैश्चेतिशेषः । मुख्यप्राणोवागादींद्रियेषुप्रकाशाद्यर्थंवागादिरूपेणतिष्ठतीत्यत्रज्ञापक मुत्तरत्रत्वमेवसर्वदेवादिषुस्थित्वातत्तन्नामातत्तद्गुणक्रियादिप्रवर्तकइतिप्राणंप्रस्तुन्वंतीति टीकाकारवचनमेव । अप्रत्ययवंतइत्युक्तमविश्वासंनिर्दिशति ॥ कुतएतदित्थमितीति ॥ अभिमानोदेहइति ॥ अभिपूर्वकमन्यतेःअकर्तरिचकारकेसंज्ञायामितिकर्मणिघञ् । उत्क्रमतइवेतिइवशब्दार्थःकिंचिदिति । उक्तंचबृहदारण्यकभाष्ये । उपमार्थेतथाल्पत्वेपीवशब्दःप्रयुज्यतइत्यभिधानं । दशरात्रैर्भुक्तमिवनसम्यक्स्वल्पभोजनादितिप्रयोगाद्धेति । इदानीमुत्क्रमणाभावाच्छांदसोलकारव्यत्ययइतिभावेनाह ॥ उदक्रामदिति ॥ एवमुत्तरत्रापिज्ञेयं । उत्तरत्रप्रतितिष्ठतीतिप्रतिष्ठोक्तेः तदुपयुक्तमध्याहरति ॥ स्वस्थितौचेति ॥ अत्रयद्यपिप्राणसंवादादिविषयेमहैतरेयेतत्त्वदेवानांएकैकस्योत्क्रमणानंतरंमुख्यप्राणस्योत्क्रमणं एकैकस्यप्रवेशानंतरंप्रवेशश्चेति उत्क्रमणप्रवेशौप्राणस्यपश्चादेवप्रतीयेते । अत्र च्छांदोग्येचप्राणस्यैवादावुत्क्रमणं । इतरेषांविराड्देहेऽवस्थातुमसामर्थ्येनपश्चादुत्क्रमणंप्रतीयतइतिविरोधोभवति । तथापिकल्पभेदेनवा एकस्मिन्नेवकल्पेद्विवारमुत्क्रमणप्रवेशकल्पनयावाऽविरोधोज्ञेयः । तथाहि ।

वागुदक्रामत् अवदन्नश्नन्पिबन्आस्तैव । वाक्प्राविशत्अवददेवेत्यादिनाएकैकस्यदेवस्योत्क्रमणप्रदेशाभ्यांविराड्देहस्यपातनो त्थानयोरसामर्थ्येनिर्णीतेसत्यपि मिलितानामस्माकंसर्वतत्त्वदेवानांमुख्यप्राणेनविनाएतद्देहधारकत्वादिसामर्थ्यंभविष्यतीत्यभि मानेन वयमेतद्बाणमवष्टभ्यविधारयामइतिपुनर्विवादेप्रसक्ते तान्वरिष्ठःप्राणउवाचेत्यादिना मुख्यप्राणस्यैवप्रथमंदेहादुत्क्रमणं तदनंतरंतेषामवस्थानमेवाशक्यं किमुतधारणादिसामर्थ्यमितिसूचयितुं तस्मिन्नुत्क्रामत्यथेतरेसर्वएवोत्क्रमंतइति । इतरदेवानां पश्चादुत्क्रमणंचोच्यतइत्यविरोधइति ॥ ३ ॥ नन्वभिमानेनप्रवृत्तानांदेवानांकथंप्राणस्तावकत्वमित्यतस्तत्संगमयति ॥ इत्थं मिति ॥ प्रतीताःविश्वासवंतःएषपृथिवीरयिरित्यत्रएषइतिसकृच्छ्रवणात्समग्रमेकवाक्यतयायोजयति ॥ पृथिवीरयिश्चेत्यादि ॥ ४ ॥ नन्वेषोग्निस्तपत्येषसूर्यइत्यादौप्राणस्याग्न्याद्यभेदप्रतीतेःसर्वदेवादिषुस्थित्वातत्तन्नामेत्याद्यर्थाप्रतीतेरुक्तप्रकारेणप्राणंस्तु न्वंतीतिवचनमयुक्तमित्याशंकानिवर्तकत्वेनाराइतिवाक्यमवतारयति ॥ कथमेतदिति ॥ कथमेतत्सर्वंप्राणइतीत्याक्षेपः । उक्तं वक्ष्यमाणंचविव्रियतइतिपरिहारः । एषोग्निस्तपत्येषसूर्यइत्याद्युक्तं प्रजापतिश्चरसिगर्भेत्वमेवेत्यादिवक्ष्यमाणंच विव्रियतइत्यर्थः। उक्तशंकापरिहारार्थमुक्तविवरणंक्रियतेचेत् प्रजापतिश्चरसीत्यादेर्विवरणाभावात्तत्रोक्तशंकापरिहारोनस्यादित्यतउक्तं ॥ वक्ष्य माणंचेति ॥ सर्वंप्रतिष्ठितमितिसामान्यतएवोक्तत्वादितिभावः । अराइवेतिश्लोकेप्राणस्यसर्वात्मकत्वघटनानप्रतीयतइत्यतो ध्याहृत्यतांदर्शयति ॥ तस्मात्सर्वंप्राणउच्यतइतिशेषइति ॥ तस्मात्सर्वधारकत्वात् । यदधीनायस्यसत्तातत्तदित्येवभण्य तइत्युक्तेः । सर्वस्यतदधीनत्वेनतदात्मकत्वव्यपदेशइत्यर्थः । अराइवेतिश्लोकःपूर्वोक्तस्यैषोग्निरित्यादेरभेदव्यपदेशस्य प्रजापति

श्वरसिगर्भेत्वमेवेतिवक्ष्यमाणप्राजापत्यभेदव्यपदेशस्यचोपपादकइति । उक्तंवक्ष्यमाणंचविव्रियतइत्युक्तं । रथनाभावराइवमुख्य प्राणेसर्वंप्रतिष्ठितं । तन्मध्येकिंचिन्निर्दिशति ऋचइत्यादि ॥ क्षत्रंक्षत्रियाः । ब्रह्मब्राह्मणाः । च अन्यच्चेत्येतदितितदर्थः । एषोग्निस्तपतीत्यनेन देवानामसिवह्नितमइत्यस्यपौनरुक्त्यंपरिहरति ॥ नकेवलंतपनक्रियावानाग्निःप्राणइति ॥ एवमुत्तरत्रापिद्रष्टव्यं ॥ ५ ॥ ग्रहाणामिति ॥ शन्यादीनामित्यर्थः ॥ एकर्षिरथर्ववेदद्रष्टासीति ॥ एकर्षिश्चाप्यथर्वणामितिऋग्भाष्योक्तेरितिभावः । उपजीव्याइतिप्रतीतिनिरासायाह ॥ स्वंपूजकाइति ॥ हेमातरिश्वेति ॥ नङिसंबुद्ध्योरितिनलोपनिषेधाभावश्छांदसइतिभावः । अतएवारुचेराह ॥ मातरिश्वनोभूतवायोरितिवेति ॥ ६ ॥ अधिदैवादिकमित्यादिपदेनाधिभूतंगृह्यते । एतद्विवरणात्मकोत्तरखंडे अधिदैवाधिभूतधारकत्वस्योक्तत्वात् । श्रीप्रज्ञाशब्दोप्रकृतोपयोगितयाव्याचष्टे ॥ प्रज्ञाधारणशोभामितियावदिति ॥ प्रकाशकत्वशक्तिंचेति ॥ ७ ॥ इतिद्वितीयप्रश्नप्रतिवचनं ॥ २ ॥ ७ ॥ अथहैनंकौसल्यः ॥ प्राणुक्तमिति ॥ प्रथमप्रश्ने प्रजापतिनामापरमेश्वरोरयिप्राणौसृष्ट्वा तद्द्वाराऽखिलजगज्जन्मादिकर्तेत्युक्तं । द्वितीयप्रश्नेपि आकाशादिमुख्यप्राणांतदेवानांविष्णुसन्निधानेनैवधारकत्वंप्रकाशकत्वंचाभिप्रेतं । प्रथमतएवविष्णोःप्रजापतिनामोक्त्याप्रजाशब्देनजगतोभगवज्जन्मोक्त्यातस्यस्रष्टृत्वंलब्धं । पतिशब्देनपालकत्वंचेतिभावः । आश्वलायनेनकृतप्रश्नेषुप्रथमःप्रश्नःसिद्धार्थइत्याशंक्यपरिहरति ॥ समिथुनमुत्पादयतइत्यादिना ॥ एवंमाख्यस्येति ॥ द्वितीयप्रश्नोक्तप्रकारेणमहानुभावस्येत्यर्थः ॥ इत्यभिप्रायइति ॥ तेनसिद्धार्थत्वंप्रश्नस्यनेत्युक्तंभवति । कथमित्यस्यकस्मात्कारणादितिव्याख्या । समवप्रवि

भ्यःस्थइतिनियमात्प्रतिपूर्वस्थाधातोरात्मनेपदाप्रसक्तेराह ॥ प्रतितिष्ठंतेप्रतितिष्ठतीति ॥ आत्मनेपदंछांदसमितिभावः ।
परिहारानुसारेणप्रश्नतात्पर्यमाह ॥ केतेविभागाइत्यादिना ॥ अधिभूतादिकमित्यत्रादिपदेनाधिदैवंग्राह्यं ॥ १ ॥ प्रशस्य
स्तुत्वा । मनोकृतेनेत्यत्रकृकारस्यहस्त्वाभावात् हशिचेत्युत्वाप्राप्तेरुत्वंच्छांदसमित्यभिप्रेत्याह ॥ मनंःकृतेनेति ॥ मनंःपरं
ब्रह्मेति ॥ मननान्मनउद्दिष्टइतिवचनात् मनोब्रह्मेतिश्रुतेश्चेतिभावः ॥ आत्मनःप्रकृतस्येति ॥ प्रकृतत्वादात्मनइत्यध्याहा
रइतिभावः ॥ आत्मानंवेत्यादिप्रश्नेति ॥ आत्मानंप्रविभज्यकथंप्रतिष्ठतइतिप्रश्नेत्यर्थः ॥ मोक्षदातृत्वेति ॥ पुण्यलोकश
ब्देनमुख्यत्वात्मोक्षग्रहणादितिभावः । सएनान्ब्रह्मगमयति विष्णुर्हिदातामोक्षस्यवायुश्चतदनुज्ञयेत्युक्तेर्मोक्षदातृत्वंमुख्यप्राण
स्यलिंगं ॥ व्यामिश्रमिवेति ॥ विरुद्धार्थमिवेत्यर्थः । आत्मनोजातत्वादुपचारेणात्मप्रविभागानित्येतत् । केतेविभागाइत्या
दिविभागप्रश्नोत्तरं । भिन्नेषुभागत्वमुपचारेणघटनीयमितिभावः । स्वयंचतत्तत्क्रियेत्यादिकोर्थःप्राणःस्वयंप्रतिष्ठतइतिश्रुत्याध्व
नितइत्याशयः ॥ ३ ॥ पायूपस्थमिति ॥ प्राण्यंगत्वादेकवद्भावइतिभावः ॥ तेनंसमाननामेतिशेषइति ॥ कश्चैषांव्यापा
रइतिप्रश्नपरिहारेसमानोदानपदयोःप्रवृत्तिनिमित्तस्यश्रुतावुदितत्वात्तदनुसारेणापानादिपदेष्वपितदुक्तिरितिज्ञेयं । किंतेनेति
तस्मादित्यस्यावतारिका ॥ संसंज्ञानेंद्रियवृत्तयइति ॥ चक्षुरादिज्ञानेंद्रियाणांमनोबुद्धिभ्यांसहसप्तत्वंद्रष्टव्यं । हृदिह्येषआत्मे
त्यस्यप्रकृतोपयोगादर्शनात्तत्संगमयितुंशंकते ॥ नन्विति ॥ विषयंसंसर्गेणेति ॥ तस्यज्ञानरूपत्वादितिभावः ॥ ४ ॥ एकश
ब्दस्यवैयर्थ्यमाशंक्यव्याख्याति ॥ एकोत्तरंशतमिति ॥ ननुएकोत्तरशतनाडीनांमध्येएकैकस्यांशतसंख्याकोपनाड्योभवंती

त्युक्तौशतोत्तरायुतसंख्याकनाडीनांलाभेपिवक्ष्यमाणद्वासप्ततिसहस्रनाडीनांकथंलाभइत्यतआह ॥ पुनस्तासांचेति ॥ अयुत संख्याकनाडीनांमध्येएकैकस्यांसप्तसप्तप्रतिनाड्यः । शतानांनाडीनांमध्येएकैकस्यांविंशतिविंशतिप्रतिशाखानाड्योभवंतीतिव क्तव्यमित्यर्थः । ततश्चसंभूयप्रतिशाखानाडीनांद्वासप्ततिसहस्राणिसंपद्यंतइतिज्ञेयं । प्रतिशरीरमितिद्वासप्ततिंद्वासप्ततिमितिवी प्साभिप्रायवर्णनं ॥ द्वितीयेति ॥ नाडीसहस्राणीतिद्वितीयेत्यर्थः ॥ षष्ठ्यर्थेयोजनीयेति ॥ यद्यपिआदशतःसंख्याःसंख्ये ये अतःपरंसंख्यानेसंख्येयेचेतिवचनात् द्वासप्ततिशब्दस्यसंख्येयपरत्वेननाडीसहस्रशब्दसामानाधिकरण्यसंभवाच्छतंब्राह्मणा इत्यादिवत् द्वासप्ततिंद्वासप्ततिंनाडीरूपसहस्राणिजानीयादितियथाश्रुतैवयोजनासंभवति नतुषष्ठ्यर्थेद्वितीयेतियोजनेति । तथापियुगानामेकसप्ततिमित्यादौसंख्यायांसंख्याशब्दस्यप्रयोगप्राचुर्यात्संख्यावाचित्वमेवस्वीकृत्यविभक्तिविपरिणामेनषष्ठ्यर्थे द्वितीयायोजितेतिज्ञेयं । अथैकयेत्यत्र एकयासहस्रासुप्रधानयानाड्यापुण्यंलोकंनयतीतिप्रतीयते । इदंचानुपपन्नं । सुषुम्नाया मोक्षमार्गत्वादित्यतःचरतीत्यनुकृष्यभिन्नवाक्यतयाव्याचष्टे ॥ अथेति ॥ पुण्येनेत्यादौपुण्यादिलोकनयनेस्वकृतंपुण्यादिकं निमित्तमुच्यतइत्यन्यथाप्रतीतिनिरासायाह ॥ जीवकृतमिति ॥ निमित्तीकृत्येति ॥ कर्तृकरणयोस्तृतीयायाअसंभवाद्धेतौतृ तीयेत्युक्तंभवति ॥ एवंज्ञानेनेति ॥ दद्यान्मोक्षादिकमितिभाष्यादितिभावः । पुण्यपापयोरन्यतरप्राचुर्येणपुण्यादिलोकप्राप्तेः समप्रधानाभ्यामित्युक्तं । साधनानुरूप्यद्योतनायसमदुःखसुखमितिमनुष्यलोकविशेषणं ॥ ५ ॥ कथंबाह्यमित्यादीत्यत्रादिश

ब्देनकथंचाध्यात्ममितिप्रश्नग्रहणं । कथमभिधत्तइतिप्रश्नपरिहाराय तंदधदित्युक्तं । अनेनाधिदैवधारकत्वमुक्तंज्ञेयं । तंदधत्
तद्धारकःसन् । उद्गच्छति ऊर्ध्वंऊर्ध्वभागंगच्छति । प्राणएव मुख्यप्राणएव । प्राणवायुं स्वदासभूतंप्राणवायुं । अनुगृह्णानोधा
रणादिनानुग्रहंकुर्वाणः । अभिप्रायमाह ॥ एतेनेति ॥ ननुप्राणादिरूपाणामध्यात्मधारकत्वंपूर्वमेवोक्तं । सत्यं । अधिदैवादिगता
निप्राणादिरूपाणितेभ्योविभक्तानितान्येवस्वाधिष्ठानैःसहजीवशरीरेस्थित्वास्वानुग्राह्यंप्राणादिपंचकंधृत्वाजीवधृत्यनुकूलानिभवं
तीत्यत्रोच्यते । पूर्वंतुश्वासप्रणयनादिव्यापारविशेषवंतिकेवलाध्यात्मगतान्येवतानिदासपंचकमधिष्ठायस्थानविशेषेषुस्थितान्यु
दितानीतिस्फुटत्वान्नदोषः । अतएवपुनःप्रश्नवाक्यमप्युपपद्यते । अधिष्ठानेनसहस्थितिस्तुतस्मादुपशांततेजाइत्यत्रस्फुटीकृता ।
तदभिमानिनंचप्राणवायुमिति । अभिधत्तइतिपूर्वेणान्वयः ॥ एवंमुत्तरत्रापिज्ञातव्यमिति ॥ मुख्यप्राणोपाननाम्नारूपेण
बहिःपृथिवीमभिधत्ते । अध्यात्मंचाधिष्ठानभूतयापृथिवीदेवतयासहैवपुरुषस्यापानदेशेस्थित्वापानवायुंजडभूतंतदभिमानिनंच
स्वदासभूतंअपानवायुमभिधत्ते । तथाबहिर्द्यावापृथिव्योर्मध्येयआकाशधारकोमुख्यप्राणरूपःसमानवायुःसस्वाधिष्ठानेनाकाशे
नसहपुरुषशरीरेजडभूतंसमानवायुंतदभिमानिनंस्वदासभूतंसमानवायुमभिधत्ते । तथाबहिर्वायुधारकोयोव्यानोमुख्यप्राणस्वरू
पःसएवस्वाधिष्ठानभूतेनवायुनासहपुरुषशरीरगंजडभूतंव्यानवायुंतदभिमानिनंस्वदासभूतंव्यानमभिधत्ते । तथाबहिस्तेजोधार
कोयउदानोमुख्यप्राणस्वरूपःसस्वाधिष्ठानभूतेनतेजसासहपुरुषदेहगंजडभूतमुदानंतदभिमानिनंस्वदासभूतमुदानंचाभिधत्तइ
तिद्रष्टव्यमित्यर्थः । अंतरेत्यस्यावृत्तिमभिप्रेत्याह ॥ अंतरा द्यावापृथिव्योर्मध्येयदाकाशइति ॥ हवावेत्येतस्यव्याख्यानं

इत्येतत्प्रसिद्धमिति । अत्रयत्तेजोधिष्ठानकमुख्यप्राणरूपोदानस्यदेहेधिष्ठानभूततेजसासहस्थित्वोदानधारकत्वमुक्तं तदुपपादकत्वेनतस्मादुपशांततेजाइतिमूलंयोजयितुमवतारयति ॥ कथमितीति ॥ तेजसासहैवोदानोवर्ततइतिकथंज्ञातव्यमित्यर्थः ॥ अंतरिति ॥ शरीरांतरित्यर्थः । सइत्यस्यप्राप्स्यतीतिक्रिययान्वयः । अनुमायेतिल्यबंतस्यानुमीयतइत्युक्तानुमित्यपेक्षयोदानापगमानुमितेःपूर्वकालत्वादुपपत्तिः । अनुमीयते विद्वद्भिरितिशेषः ॥ ६ ॥ संगतिविशेषलाभादिति ॥ यद्यपिकथमभिधत्तइत्यादिप्रश्नपरिहारात्पूर्वमेवप्रश्नानुसारेणकेनोत्क्रमतइतिप्रश्नोत्तरंवक्तव्यं । तथाप्यध्यात्मंतेजोनियामकस्योदानस्यजीवनहेतुत्वमुक्त्वातदुपपादयितुं तस्मादुपशांततेजाइति जीवानांमरणस्योदानाधीनत्वकथनप्रसंगादुत्क्रमणमपिउदानरूपेणैवभवतीतिकेनोत्क्रमतइति प्रश्नपरिहारकथने संगतिविशेषलाभादिदानींकेनोत्क्रमतइतिप्रश्नोत्तरमुच्यतइत्यर्थः । अतएवोदानरूपेणोत्क्रमणमित्यनुपदमेववक्ष्यति ॥ परमात्मनासहेति ॥ तमुत्क्रामंतंप्राणोनूत्क्रामतीतिश्रुतेरितिभावः ॥ यथासंकल्पितमिति ॥ यंयंवापिस्मरन्भावंत्यजत्यंतेकलेवरमितिस्मृतेरितिभावः । इच्छार्थकस्यसंकल्पितशब्दस्यस्मृत्यर्थत्वेज्ञापकमाह ॥ अतएवेति ॥ यथाप्रतीतार्थत्वेप्यविरोधइत्याह ॥ स्वाभिप्रेतामिति ॥ अनेनात्मनास्वेनसंकल्पितमित्यपियोजनोक्ताभवति ॥ अनेनेति ॥ प्राणरूपस्यैवोत्क्रमणहेतुत्वेतेजसायुक्तइतिविशेषणंव्यर्थंस्यात् । अतउदानरूपेणजीवादीन्गृहीत्वातेनसाकंपरमात्मानमनूत्क्रामतीतिज्ञेयमित्यर्थः । एवमेवैषप्राणइतरान्प्राणान्पृथक्पृथगेवसन्निधत्तइत्येतदर्थसंग्रहायविभुत्वमित्यस्यस्वाम्यंवेतिव्याख्यानांतरं ॥ चशब्देनेति ॥ समुच्चितमितिशेषः । बाह्यधारकत्व मादित्यपृथिव्यादिधारकत्वं । उत्क्रमणं उदानरूपेणेतिशेषः ॥ ७॥ इति

तृतीयप्रश्नप्रतिवचनं ॥ ३ ॥ अथहैनंसौर्यायणी ॥ नन्वत्रक्रियमाणाःप्रश्नाःसर्वेप्यनुपपन्नाः केषांचिद्व्यापारोपरमः केषां चिन्नेतिसिद्धे कानिस्वपंतिकानिजाग्रतिचेतिप्रष्टव्यत्वात् जीवस्यैवस्वप्नदर्शनंसुखंचेत्यनुभवसिद्धत्वेनसिद्धार्थतापातात् । सर्वेषा मन्याधीनत्वेसिद्धेकिमधीनाइतिप्रष्टव्यत्वात् दर्शनश्रवणादीनांइंद्रियव्यापाराणांजीवप्रयत्नानुविधायितादर्शनेनजीवाधीनत्व स्यवा क्वचिज्जीवप्रयत्नंव्यतिरेकेपितद्दर्शनेनतदनियमावगमेपि प्राणस्येतद्वशेसर्वमित्यादिपूर्वोक्तरीत्या मुख्यप्राणाधीनत्वस्यवा तस्यापिजीवत्वेनस्वातंत्र्यासंभवे यथैषापुरुषेच्छायेतिसर्वस्यपरमेश्वरवशत्वस्योक्तत्वेन परमेश्वरवशत्वस्यवा संभवेनप्रश्नानवका शाच्चेत्यतोवक्ष्यमाणपरिहारानुसारेणतदभिप्रायंवदंस्तत्रतत्रान्यथाप्रतीतिंचनिराकुर्वन्व्याचष्टे ॥ भगवन्नित्यादि ॥ स्वपंति सतीति ॥ इयंशेषोक्तिः । जाग्रदवस्थायांपुरुषशरीरेइंद्रियदेवानांउपरमाभावात् स्वापकालेगाढनिद्रायुतत्वेनस्वाप्नपदार्थदर्श नाभावात्कथंस्वाप्नपदार्थदर्शनप्रश्नइत्यतआह ॥ स्वप्नोद्विविधइति ॥ ननुशरीरिणोजीवस्यैवस्वप्नद्रष्टृत्वात् इंद्रियदेवानांच तदभावात्कतरएषदेवःस्वाप्नान्पश्यतीतिप्रश्नासंभवमाशंक्यतदभिप्रायमाह ॥ सर्वेंद्रियाणामिति ॥ तत्रतत्रपृथगेववावतारि काद्रष्टव्या। तथाचपश्यतीत्येतदंतर्णीतण्यर्थकमित्युक्तंभवति । योजनातुकतरइंद्रियाभिमानीदेवःस्वप्नावस्थापन्नंजीवंस्वप्नान्स्वाप्न पदार्थान्पश्यतिदर्शयतीति । विषयसंसर्गादीत्यादिशब्देनविषयानुभवोगृह्यते ॥ बहूनांतदयोगादिति ॥ एकस्मिन्शरीरेब हूनांस्वातंत्र्येएकस्मिन्नेवक्षणेऽनेकविरुद्धादिक्रियाप्राप्त्याशरीरमुन्मथ्येतेतिभावः ॥ क्वचिदतद्वशत्वस्यापीति ॥ निद्रारोगा दिप्रतिबंधेइंद्रियदेवानांजीवापेक्षितज्ञानाद्यकरणदर्शनादितिभावः । अनवस्थितेरसंभवाच्चनेतरइतिसूत्रोक्तदूषणमाह ॥ तस्यां

पीति ॥ तस्यापिजीवत्वेनेंद्रियदेवादिवन्नियामकांतरसापेक्षत्वे तस्याप्येवंतस्याप्येवमित्यनवस्थितिः । स्वातंत्र्यंचेदसंभवः । अस्यजीवत्वमेवनस्यादितिभावइतिकेचित् । जीवभूतस्यमुख्यप्राणस्यजीवांतरनियामकत्वेऽस्येश्वरनियम्यत्वानंगीकारे जीवांतर नियम्यत्वमंगीकार्यं । तस्याप्येवंतस्याप्येवमित्यनवस्थानात् । मुख्यप्राणस्यापिजीवत्वाविशेषाज्जीवनियामकत्वासंभवाच्चेत्यर्थइ त्यपरे ॥ [११।१५] तत्कुतइति ॥ सर्वाश्रयत्वोपपादकं किमद्भुतंपरमेश्वरस्यमाहात्म्यमित्यर्थः ॥ १ ॥ यथागार्ग्येतिवाक्यस्यप्रतीतार्थेले शतोनुपपत्तिंप्रदर्श्यार्थांतरमुच्यतेभाष्ये । तत्रभाष्योक्तामनुपपत्तिंविवृण्वन्तद्दिशादार्ष्टांतिकवाक्यस्यापातप्रतीतार्थेप्यनुपपत्तिं वदन्भाष्यमवतार्यकिंचिद्व्याचष्टे ॥ [११।१६] अत्रार्कमरीचीनामित्यादिना ॥ अत्रेति ॥ अस्मिन्वाक्यइत्यर्थः ॥ [११।१६] अत्रेति ॥ एतद्दे शइत्यर्थः । पृथग्दर्शनादिनेत्यादिशब्देनप्रकाशनादिव्यापारउच्यते ॥ [११।१७] स्वापेवक्तव्यइति ॥ इंद्रियप्रेरणारूपव्यापारोपरमइ त्यर्थः ॥ [११।१९] सुप्तिगस्येति ॥ सुप्त्यवस्थापन्नस्यजीवस्यसंबंधिनोयेदेवाःतेषामित्यर्थमभिप्रेत्यसंबंधप्रदर्शनायतदिंद्रियाद्यभिमानीत्यु क्तमित्यर्थः । सुप्तिगस्यापिभगवत्सामीप्यस्यप्रमितत्वाच्चशब्दमध्याहृत्यद्वितीयंव्याख्यानं ॥ ७ ॥ ततश्चायंसमग्रभाष्यार्थः ॥ अन्यदृष्टिव्यपेक्षया अन्येषांदेशांतरगतानांपृथग्दर्शनान्निमित्तात् । उपलक्षणमेतत् । प्रकाशनादिव्यापाराच्चसूर्यरश्मीनामुदया स्तमययोरविशेषेपि अस्तमयेतददर्शनात् । तेषांरश्मीनामेतद्देशगतैःप्रकाशनादिव्यापारहेतुत्वेनादृष्टत्वात्जातरश्मयःसूर्यमंड लंयांतीतिभ्रांत्यातथाव्यवह्रियंते । एवमुदयेपिमंडलमात्रदर्शनानंतरंरश्मीनांक्रमेणदृष्टेर्मंडलान्निर्गत्यचरंतीतिभ्रांत्यैवोच्यंतइति द्रष्टव्यं । तथाचभ्रांतिप्रतीतार्थोदृष्टांततयात्रोच्यतइत्युक्तंभवति । अत्रदृष्टांतवाक्येतेजोमंडलएकीभवंतीतिभ्रांत्यनुवादेनमरी

चीनांसूर्यमंडललक्षणैकस्थानप्राप्तभ्रमनिमित्तत्वंप्रकाशतापनादिव्यवहारहेतुत्वंचेतियत्प्रमेयद्वयमभिप्रेतंतदनुसारेणदार्ष्टांतिकवाक्यार्थउच्यते ॥ एवमिति ॥ ईर्यंते श्रुतावितिशेषः । एकीभावशब्दप्रयोगस्यस्वरूपैक्यप्राप्तौक्काप्यदृष्टत्वात् । गावःसायंगोष्ठेएकीभवंतीत्यादौएकस्थाननिवासप्राप्तौचदृष्टत्वात् । बहुतरक्षीरेणैकीभूतस्यपृथग्व्यवहारादर्शनेनैकीभावशब्दस्यतत्कार्येप्रवृत्त्यकरणत्वेचलक्षणासंभवादितिभावः । अत्र देवानांस्वस्वव्यापारकर्तृत्वमेवप्रकृतप्रश्नस्योत्तरतयाभिप्रेतं भगवत्सामीप्यप्राप्तिस्तुस्वस्वस्थानेषुस्थितानांतेषांव्यापाराभावासंभवात्तदुपपादकतयोक्ता अन्यथाऽसंगतेः । तेनतर्ह्येषपुरुषोनश्रृणोतीत्यादिप्रपंचनाच्चेति । शरीरी जीवः ॥ [१२।४] मनसिस्थितइति ॥ मनसीत्यनंतरंस्थितइतिश्रुतौशेषोक्तिः । तैजसनामकविष्णुविशेषणंचैतत् । उपनिषदिअन्यदप्यध्याहरति ॥ [१२।४] सुषुप्तावित्यादिना ॥ प्राज्ञनामकविष्णुविशेषणमेतत् ॥ [१२।४] अनेनेति ॥ उपनिषदिमनसीतिवचनेनेत्यर्थः ॥ यतएवमिति ॥ स्वप्नेमनोव्यतिरिक्तसर्वेंद्रियाणामुपरमइत्यर्थः ॥ [१२।६] स्वप्नविवक्षयाचैतदिति ॥ दर्शेंद्रियमात्रव्यापारराहित्यकथनमित्यर्थः ॥ [१२।६] नमनुतइत्याद्यपीति ॥ आदिशब्देन नबुध्यतेनाहंकरोतिनचेतयतइत्यादिपरिग्रहः । संकल्पादिरूपमनोव्यापारादिकंनकरोतीत्यर्थः । श्रुतौसर्वेंद्रियव्यापाराभावोक्त्यनंतरंस्वपितीत्याचक्षतेइत्यस्यासंगतत्वशंकावारणार्थं पूर्वोक्तहेत्वनुवादपूर्वकंकर्त्रध्याहारंकुर्वंस्तद्वाक्यंयोजयति ॥ [१२।६] यतएवमिति ॥ आचक्षते जीवमितिशेषः । अत्र स्वंह्यपीतोभवतीतिश्रुत्यंतरोक्तहेतुमर्थकथनपूर्वकंयोजयति ॥ [१२।७] स्वंस्वतंत्रमिति ॥ [१२।७] अप्येतीति ॥ अपि अपिहितःप्राज्ञेनालिंगितः । एति प्राज्ञंप्राप्नोतीत्यर्थः ॥ २ ॥ [१२।८] प्राणाःप्राणादीति ॥ प्राणाएवाग्नयःइतिविवक्षितविग्रहगतबहुत्वचनार्थःप्राणादीति । ननु

प्राणापानव्यानानामेवोत्तरत्राग्नित्वस्य समानोदानयोरध्वर्यूद्गातृभावस्यवक्ष्यमाणत्वात्कथंप्राणादीनांपंचानामग्नित्वमुक्तमित्यत आह ॥ [१२।८] अग्नयइत्युपलक्षणमिति ॥ उपलक्षणेबीजमाह ॥ [१२।९] ऋत्विग्भावस्यापीति ॥ प्राणादीनांपंचानांमध्यइतिशेषः ॥ [१२।९] अग्न्यादित्वमित्युच्यतइति ॥ अग्नित्वंऋत्विक्त्वंचकथमित्यतउच्यतइत्यर्थः ॥ पश्चिमत्वेति ॥ पश्चिमद्वारभूतेगुदेविद्यमानत्वेनापानस्यपश्चिमत्वमित्यर्थः ॥ [१२।१०] होमांगत्वसाम्यादिति ॥ व्यानायस्वाहेतिहोमांगत्वसाम्यादित्यर्थः ॥ [१२।१०] प्राणोप्ययेशीनादिति ॥ यथागार्हपत्याग्नेःपृथक्कृत्वाऽऽहवनीयकुंडेनीतोग्निराहवनीयइत्युच्यते तथाऽपानप्रदेशात्अपानरूपमुख्यप्राणात्पृथक्कृतःश्वासरूपःमुखेनीतआहवनीयइतिभावः ॥ [१२।१२] पराधीनेति ॥ यथाप्रसिद्धयजमानस्यस्वर्गादिफलंऋत्विगधीनं तथासुषुप्तौजीवस्यसुखरूपफलप्राप्तेरुदानाधीनत्वादितिभावः । ननुप्राणाग्नयएवैतस्मिन्पुरेजाग्रतीत्युक्तप्राणाग्नित्वाद्युपपादनार्थं गार्हपत्योहवेत्यादेर्ब्रह्मगमयतीत्यंतस्यवाक्यस्यप्रवृत्ततया मनोहवावयजमानइत्यनेनमनःशब्दितजीवस्ययजमानत्ववचनंप्रकृतासंगतमेवेत्यतआह ॥ [१२।१२] इत्युत्तरार्थवचनमिति ॥ उदानस्योद्गातृत्वोपपादनार्थंप्रवृत्ते सएषएनंयजमानमहरहर्ब्रह्मगमयतीत्यस्मिन्वाक्ये एनंयजमानमितिपरामर्शार्थं उपोद्धातसंगत्याजीवस्ययजमानत्वमुक्तमितिभावः । उदानस्यकथमिष्टफलत्वमित्यतोलक्षणयेष्टफलशब्दंव्याचष्टे ॥ [१२।१३] यज्ञफलप्रतिपादकइति ॥ इष्टफलप्रतिपादकत्वकथनस्यकथमत्रोपयोगइत्यतआह ॥ [१२।१३] उद्गातेतियावदिति ॥ उदानस्यफलप्रतिपादकत्वेकथमुद्गातृत्वमित्यतआह ॥ [१२।१३] फलप्रतिपादकत्वसाम्यादिति ॥ उद्गातुर्यज्ञफलप्रतिपादकत्वेनोदानस्यतत्साम्यादितिभावः । ननूदानस्याहरहर्ब्रह्मगमकत्वेश्रवणादिसाधनवैयर्थ्यमित्यतोविवक्षितंब्रह्मगमनमाह ॥

[१२।१४] सुषुप्तागतामिति ॥ प्राज्ञमित्यर्थः । ननुकानिजाग्रतीतिप्रश्नस्य प्राणाजाग्रतीतिजागरणवचनेनैवपरिहर्तव्यत्वा दपृष्टप्राणाग्नित्व ऋत्विक्त्वकथनमसंगतमेवेत्यतआह ॥ [१२।१४] यएवंवेदेति ॥ [१२।१४] ब्रह्मप्राप्तिफलमिति ॥ ब्रह्मप्राप्तिलक्षणंमोक्षफलमित्यर्थः ॥३॥ [१२।१६] तृतीयस्येति ॥ कतरएषदेवःस्वप्नान्पश्यतीत्यस्येत्यर्थः । ननुदेवानामस्वप्नत्वादेषदेवःस्वप्नेमहिमानमनुभवतीत्ययुक्तमित्यतआह ॥ [१२।१७] तेनानुगृहीतोजीवइतियावदिति ॥ ननुस्वस्यदुःखित्वादेरप्यनुभवात्कथंमहिमानमित्युक्तमित्यतोपेक्षितमध्याहरति ॥ [१२।१७] अन्यच्चेति ॥ दुःखादिकंचेत्यर्थः । दृष्टंदृष्टमनुपश्यतिइत्यत्रवीप्सायांद्विर्वचनमितिभ्रांतिंवारयति ॥ [१२।१७] यमर्थंपश्यतीत्यादिना ॥ अनेनदृष्टंदृष्टमितिद्विरुक्तेर्नित्यवीप्सयोरित्यत्रनित्यशब्दस्यावधारणार्थत्वमाश्रित्यदृष्टमेवार्थमित्यर्थपरत्वमुक्तंभवति । उत्तरत्रश्रुतमेवार्थमित्यादावेवकारस्तु अस्यैवार्थस्यस्पष्टीकरणार्थः । दृष्टश्रुतयोर्ग्रहणं स्पृष्टादेरुपलक्षणार्थमित्यभिप्रेत्याह ॥ [१२।१८] एवमन्यदपीति ॥ अदृष्टमित्यस्यसर्वथाऽदृष्टमित्यर्थप्रतीतेराह ॥ [१२।२०] जन्मांतरइति ॥ तत्समभिव्याहृतदृष्टशब्दस्यप्रतियोगिसमर्पकस्यास्मिन्जन्मनिदृष्टमित्यर्थकत्वेनास्यतद्भिन्नजन्मांतरेदृष्टमित्यर्थकत्वमितिभावः ॥ एवमुत्तरत्रापीति ॥ अस्मिन्जन्मनिश्रुतंश्रुतं जन्मांतरेऽश्रुतंअश्रुतंघ्राणादिनाऽस्मिन्जन्मनिआघ्रातादिकंअनुभूतं जन्मांतरेआघ्रातादिकमननुभूतमितिद्रष्टव्यमित्यर्थः । ननुअनुभूतंचाननुभूतंचेत्यस्य दृष्टंचादृष्टंचश्रुतंचाश्रुतंचेत्यनेनपौनरुक्त्यमाशंक्य गोबलीवर्दन्यायेन दृष्टादृष्टश्रुताश्रुतेत्येवंरूपविशेषवाचिपदसमभिव्याहृतानुभूताननुभूतवाचिपदयोः अस्मिन्जन्मनिस्पृष्टादिकंअनुभूतं जन्मांतरेस्पृष्टादिकमननुभूतमित्यर्थकत्वान्नदोषइत्याह ॥ [१२।२०] अनुभूतमननुभूतमिंद्रियांतरेणेति ॥ इंद्रियांतरेणेत्यस्यदृष्टिश्रुत्यतिरिक्तत्वगा

दींद्रियेणेत्यर्थः । तदानीं स्वप्नकाले । स त्क्वचिद्विद्यमानं । अस न्निवृत्तं स्वप्नात्पूर्वंध्वस्तं । यद्यप्येतयोःसदसतोःस्वप्नावस्था यांदर्शनाभावः वासनामयत्वाभावात् । तथाप्यत्रसदसच्छब्दाभ्यांतत्सदृशयोर्ग्रहणमितिभावः ॥ चतुर्थमिति ॥ कस्यैत त्सुखंभवतीत्येतंप्रश्नमित्यर्थः ॥ भगवंतमिति ॥ प्राज्ञमित्यर्थः ॥ ४ ॥ ननुशरीरशब्दस्याबाधितश्रौतप्रयोगबलात् जीववा चित्वांगीकारे भगवतःशरीरवदितिपूर्वभाष्ये जीवेशरीरशब्दस्यगौणवृत्तिप्रदर्शनमसंगतमित्यतआह ॥ तथापीति ॥ शरीरश ब्दस्यजीवेगौणवृत्त्यनंगीकारेपीत्यर्थः । तात्पर्यमेवोक्तमित्यत्र नगौणावृत्तिःप्रदर्शितेत्यवधारणार्थः । किंतत्तात्पर्यमित्यतःतदुप पादयति ॥ तथाहीति ॥ परमेश्वरसन्निधानसामर्थ्योद्भूतमिति ॥ अत्रस्वरूपसुखमनुभवतीतिवक्तव्ये परमेश्वरेत्यादि वचनं तमोयोग्यानांस्वरूपसुखाभावेपि सुषुप्तिकालेसुखानुभवसमर्थनार्थं । परमेश्वरपदग्रहणेन सुषुप्तिकालेमनसउपरमेपिअ चिंत्यैश्वर्यवशात्स्वसन्निधानेननिमित्तेनवृत्तिरूपंसुखंजनयित्वासुखानुभवकरणस्यसूचितत्वात् । मुक्तियोग्य नित्यसंसारिणांतु स्वरूपसुखस्यसत्त्वेनतदनुभवसंभवः । सुषुप्तिकालेबाह्येंद्रियाणामुपरमेपि स्वरूपेंद्रियेणैवसौषुप्तिकसुखानुभवइतिज्ञातव्यं ॥ आत्मस्वरूपज्ञानेनेति ॥ साक्षिरूपेणेंद्रियेणेत्यर्थः ॥ अंतिमप्रश्नेति ॥ पराधीनाएतेसर्वेकस्मिन्प्रतिष्ठिताभवंति । परमेश्वर श्चेदाश्रयःतत्कुतइत्यंतिमप्रश्नेत्यर्थः ॥ सदृष्टांतोयथेति ॥ तच्छब्दस्यप्रसिद्धार्थकस्यदृष्टांतपरत्वमाश्रित्येदंवचनंज्ञेयं । परमे श्वरस्यसर्वाश्रयत्वं वृक्षस्यपक्ष्याश्रयत्वं येनप्रकारेणतेनप्रकारेणेतिभावः ॥ वासोयत्रेति ॥ अत्र वाससोनिवासस्यवृक्षो वा सोवृक्षइतिषष्ठीतत्पुरुषः तस्यतात्पर्यार्थः ॥ वासोयत्रात्मनांतंवृक्षमिति ॥ अत्रात्मशब्दःस्वात्मार्थः वासोनिवासः । वस

निवासइत्यतःवसेर्णिच्चेतिभावेऽसुन्प्रत्ययेणित्वाद्वृद्धौवासस्इतिसांतःशब्दइतिकेचित्व्याचक्षते । वासइत्यस्याकारांततां सांत तांवाऽभ्युपेत्यभिन्नपदत्वमाश्रित्य यत्रात्मनामित्यस्याध्याहारंचांगीकृत्य वासोयत्रात्मनामितिव्याख्यानमित्यपिभाति । संप्रतिष्ठं तइत्येतत्प्रपूर्वकतिष्ठतेर्गमनार्थत्वमाश्रित्यव्याचष्टे ॥ [१३।१५] संप्रतिष्ठंतेअभिगच्छंतीति ॥ प्रस्थानंगमनंगमइत्यमरोक्तेःरूढ्याश्रये णार्थमुक्त्वायोगाश्रयेणाप्यर्थमाह ॥ [१३।१६] तमाश्रित्यतिष्ठंतिचेति ॥ संप्रशब्दयोरुपसर्गत्वात्ससाधनक्रियाप्रतिपादकत्वेन तमा श्रित्येतिव्याख्यातं । पृथिव्यादिशब्दानांसंकलय्योक्तेः । केषांचिच्छब्दानांअप्रतीतार्थत्वाद्विविच्यार्थमाह ॥ [१३।१७] अत्रपृथिवीत्या दिनेति ॥ श्रुतौआपोमात्रेतिसमासपदेषष्ठ्याःसुपांसुपोभवंतीतिवार्तिकेनच्छांदसोजसादेशः ॥ [१३।१८] अंतःकरणपंचकमिति ॥ अंतःकरणप्रभेदपंचकमित्यर्थः । तत्रसंकल्पविकल्पात्मकंमनः । करोमिनकरोमीतिसंकल्पविकल्पौ निश्चयात्मिकाबुद्धिः । अ स्वरूपेस्वरूपत्वबुद्धिरहंकारः । स्वातंत्र्यबुद्धिरितियावत् । अस्थिरस्मरणंचित्तं चित्तस्यविषयेषुव्याप्तिश्चेतना । बहुविषयकत्व मितियावत् । ननु स्थलांतरेमनोबुद्धिरहंकारश्चित्तंचेतनेतिकथ्यते । अत्रतुपंचमंतेजइति अतस्तद्विरोधइत्यतआह ॥ [१३।१८] तेजःश ब्देनेति ॥ एवंहवैतत्सर्वंपरेआत्मनिसंप्रतिष्ठतइति परमात्मनःसर्वनियामकत्वमुक्तं । तदयुक्तं । पृथिवीचेत्यादौप्रकृत्यादेरनु क्तत्वादित्यतआह ॥ [१४।१] सर्वस्यापीति ॥ प्रकृत्यादेःसर्वस्यापीत्यर्थः । संग्रहः । कर्तव्यइतिशेषः । उपलक्षणयाप्रकृत्यादेर्ग्रहणंका र्यमितियावत् । एवममुख्यनियम्यमुक्त्वा मुख्यनियम्यमाह ॥ [१४।१] प्राणइति ॥ तस्यकथंपृथिव्याद्यपेक्षयामुख्यनियम्यत्वमित्यत आह ॥ [१४।१] मुख्यइति ॥ मुख्यवायुत्वादित्यर्थः । तदुपपादयति ॥ [१४।१] धारकइति ॥ सर्वस्यधारकत्वात् । अयंभावः । पृथिव्यादेः

साक्षान्मुख्यप्राणनियम्यत्वं मुख्यप्राणस्यसाक्षाद्भगवन्नियम्यत्वमिति । तदेवदर्शयति ॥ [४।१]तेनविधारयितव्यंपृथिव्यादिकंसर्वमिति ॥ ५ ॥ [४।१]कथंसर्वस्यतदधीनतेतीति ॥ कथंमुख्यप्राणद्वारासर्वस्येश्वरनियम्यत्वंज्ञातव्यमितिशंकायामित्यर्थः । ननुद्रष्टास्प्रष्टेत्यादिनाद्रष्टृत्वाद्युक्तिप्रतीतेश्चक्षुरादीनामीश्वराधीनत्वोक्तिःकथमित्यतोद्रष्टेत्यादावंतर्णीतण्यर्थत्वमाश्रित्यचक्षुरादीनामित्यध्याहृत्यईश्वराधीनत्वंघटयति ॥ [४।२]चक्षुरादीनामिति ॥ तथाचद्रष्टेत्यादौ चक्षुरादीनामिंद्रियाणांतदभिमानिदेवतानांचदर्शयितेत्यादिप्रतिपदंबोध्यं । दर्शनादिशक्तिप्रदइतितुतात्पर्योक्तिः । ननुविज्ञानात्मेत्यत्रापिअंतर्णीतण्यर्थत्वेद्रष्टेत्यादिनापुनरुक्तिःस्यादित्यतआह ॥ [४।२]स्वयंचेति ॥ विज्ञानात्मापुरुषइत्यस्योपयोगंदर्शयति ॥ [४।३]अंतश्चेति ॥ सर्वज्ञत्वात्पूर्णत्वाच्चेत्यर्थः ॥ [४।३]तदस्येति ॥ सचासावयंचतदयं । तस्यतदस्य । तच्छब्देनपृथिव्याद्याधारत्वपरामर्शः । तथाच तदस्य पूर्वोक्तपृथिव्याद्याधारस्यास्यविज्ञानात्मनोवेदनस्य ज्ञानस्येत्यर्थः ॥ [४।४]अच्छायमविद्यारहितमिति ॥ छायत्वविद्यासंप्रोक्तेतिकाठकभाष्योक्तेरितिभावः ॥ [४।५]वेदयतेविजानातीति ॥ चुरादित्वात्स्वार्थेणिजितिभावः ॥ [४।५]सर्वप्रधानस्येति ॥ सर्वोविष्णुस्तंजानातीतिविग्रहः । विष्णोःसर्वत्वंनाम स्वातंत्र्येचविशिष्टत्वइत्युक्तेःसर्वप्राधान्यमित्यर्थः ॥ [४।५]सर्वकारणस्यचेति ॥ सर्वशब्दस्यतत्कारणेब्रह्मणिलक्षणेतिभावः । सर्वज्ञशब्दस्यैवगौणीवृत्तिमाश्रित्यपक्षांतरमाह ॥ [४।६]तत्सदृशत्वादिति ॥ ब्रह्मसदृशत्वाज्जगतइत्यर्थः । पक्षांतरमाह ॥ [४।६]सर्वस्यापिकर्मादेरिति ॥ तथाचसर्वकर्मादिकंजानातीतिविग्रहः । ज्ञानिनोशेषकर्मज्ञानस्यबाधितत्वात्सर्वशब्देनाशेषकर्मसाध्यज्ञानविषयीभूतंब्रह्मगृह्यते । यद्यप्येकैकस्यज्ञानिनःसर्वकर्मकरणंनास्ति । तथापि बहूनांतत्तत्कर्मजन्यज्ञान

संभवात्सर्वकर्मजन्यज्ञानविषयत्वंब्रह्मणःसंभवति ॥ ततश्चसर्वज्ञत्वंनामबह्वधिकारिकृतसर्वकर्मजन्यज्ञानविषयीभूतब्रह्मज्ञत्वमे
वेतिभावः ॥ [१४।६]प्रांसमनेनेति ॥ ज्ञाधातोरातोनुपसर्गेकइतिकर्तरिकप्रत्ययइतिभावः । ज्ञानिनोब्रह्मैक्यस्यबाधितत्वात् उत्तरत्र
प्रमाणवाक्ये सर्वमेवाविवेशेतिव्याख्यातत्वाच्चेत्यतआह ॥ [१४।७]तेद्भूतइवेति ॥ [१४।७]विज्ञानस्वरूपोजीवइति ॥ अत्रविशब्देन नि
त्योत्तमत्वरूपविशिष्टत्वंगृह्यते । आत्मशब्देनस्वरूपंदेहोजीवश्चगृह्यते । ज्ञानशब्दश्च आनंदाद्युपलक्षकः । तथाचवि सर्वदावि
द्यमानं दुःखाद्यसंभिन्नंयज्ज्ञानानंदादिकं सएवात्मादेहोयस्यसजीवोविज्ञानात्मेत्यर्थः । एतस्यकुत्रोपयोगइत्यतआह ॥ शरीरे
[१४।७]सुखंभवतीतिह्युक्तमिति ॥ सौर्यायणेगार्ग्यस्यप्रश्नोत्तरगतत्वात्सौम्येतितस्यैवाभिमुखीकरणमितिनभ्रमितव्यमित्याह ॥
[१४।९]सोम्येतिकस्यचित्संबुद्धिरिति ॥ अस्यश्लोकगतत्वादितिभावः । आविवेशेत्यस्यलिट्त्वाद्भूतार्थत्वमात्रत्वभ्रांतिंवारयति ॥
[१४।१]ध्रुवंमाविशत्येवेति ॥ एष्यत्तुनिश्चितंयत्तदतीतत्वेनभण्यतइतिवचनादितिभावः ॥ ६ ॥ ७ ॥ इतिचतुर्थप्रश्नप्रतिवचनं
॥ ७ ॥ ४ ॥ [१४।१०]अथहैनंशैब्यः ॥ [१४।१०]एवंमुक्तलक्षणमिति ॥ पृथिव्यादिसर्वाधारत्वलक्षणमित्यर्थः । ॐकारंप्रणवमित्यन्यथाप्र
तीतिनिरासायाह ॥ ओमित्या[१४।१३]क्रियमाणामिति ॥ विष्णवादिशब्दान्विहायोंकारमित्युक्तेरभिप्रायमाह ॥ [१४।१३]ओमितिमंत्रेणे
ति ॥ एकमात्रमभिध्यायीतेत्यत्रावयवार्थाप्रतीतेर्विशेष्याप्रतीतेश्चविग्रहप्रदर्शनपूर्वकंतद्वक्तुं तदुपयुक्तमाह ॥ [१४।१६]अकारेत्यादि
ना ॥ यद्यपिअवतेष्टिलोपश्चेतिउणादिसूत्रेणअवधातोर्मन्प्रत्ययंकृत्वा प्रत्ययटिलोपंविधाय ततोज्वरत्वरेतिसूत्रेणधातोरुपधा
याश्चोठि सवर्णदीर्घे सार्वधातुकार्धधातुकयोरितिगुणे ओमितिरूपनिष्पत्तिः ॐतत्ववाचीह्योंकारइत्यनुव्याख्यानेआचार्यैरंगी

कृता । तथापिव्याख्यानांतरमेतदित्यवधेयं । अस्मिन्पक्षेतु । अतसातत्यगमनइतिधातोरौणादिकेडप्रत्यये अइतिरूपं वेञःक्वि पि वचिस्वपीतियजादित्वात्संप्रसारणेउइतिरूपं । मन्यतेरौणादिकेड्विप्रत्ययेमूइतिरूपं । पूर्वयोरकारोकारयोराद्गुणेऽमितिरूप निष्पत्तिः । इममेवपक्षमभिप्रेत्याकारादीनामोंकारांशत्वोक्तिरवधेया । श्रुतौअंशस्यैवमात्रेतिवचनंज्ञेयं ॥ तत्फलरूपमिति ॥ एकमात्रार्थज्ञानपूर्वकप्रणवोपासनफलरूपमित्यर्थः । महिमानं महत्वं । अनुभवति प्राप्नोति । द्विमात्रेणमनसिसंपद्यतइत्यस्या क्षरार्थमुक्त्वाभिप्रायमाह ॥ तिसृष्विर्त्यादिना ॥ पुनरावर्ततइत्यस्यसोमलोकंप्रतिपुनरागच्छतीतिभ्रांतिनिरासायाह ॥ तत श्च्यवतइति ॥ पुनरभिवृद्धज्ञानोभवतीति ॥ पूर्वमात्मांतरात्मनोरपरोक्षज्ञानस्यजातत्वात्पुनरित्युक्तं । ब्रह्मोपदेशस्यचर मत्वेनतदुपदिष्टप्रकारध्यानेनापरोक्षीकृतस्यसाक्षान्मोक्षसाधनत्वात् । तस्यचवासुदेवत्वादितिभावेनोक्तं ॥ वासुदेवमिति ॥ कथमुक्तशंकापरिहारइत्यतआह ॥ पुरुषमीक्षित्वाचेति ॥ श्रुतौततस्तंप्राप्नोतीत्यध्याहारेणेतिभावः । तत्रयुक्तिमाह ॥ समा ख्यावशादिति ॥ भाष्योदाहृतसमाख्यावशादित्यर्थः । तत्र मुच्यतेनात्रसंशयइत्युक्तेरितिभावः । युक्त्यंतरमाह ॥ यत्तच्छां तमिति ॥ एतेनेति ॥ प्रणवेनहरिंध्यायन्नित्यनेनेत्यर्थः । परव्याख्यानमनूद्यदूषयति ॥ अत्रेति ॥ अत्रादिशब्देनत्रिमात्रे णैतेनैवाक्षरेणेत्येतद्ग्राह्यं ॥ प्रतीकतयेति ॥ प्रतिमात्वेनेत्यर्थः ॥ परांस्तामिति ॥ तृतीययाॐकारस्यकरणत्वोक्ते र्हरिमिति द्वितीययाचहरेरुपासनाकर्मत्वोक्तेरितिभावः । शंकते ॥ ॐकारमिति ॥ तत्रतत्रेति ॥ ॐकारमितिप्रश्नवाक्ये एकमात्रमि

तिप्रतिवचनेचेत्यर्थः ॥ [१५।१२] न्यायादिति ॥ त्यजेदेकंकुलस्यार्थेग्रामस्यार्थेकुलंत्यजेत् । ग्रामंजनपदस्यार्थेआत्मार्थेपृथिवींत्यजेदिति भारतोक्तन्यायादित्यर्थः ॥ [१५।१२] बहुशःश्रवणादिति ॥ अतोवैलक्षण्यमितिभावः । ननुभवत्पक्षेएकमात्रमित्यादेःतृतीयांतत्वेन विपरिणामःस्यात् । अस्माकंतुद्वितीयांतत्वेनेतिपक्षद्वयसाम्यंस्यादित्यतआह ॥ [१५।१३] समाख्यात्वस्माकमिति ॥ अंगीकृत्यचेदमुदितं । वस्तुतःतृतीयायःबहुशःश्रवणेनसाम्यस्यैवासिद्धेः । एकमात्रमित्यादौबहुव्रीहित्वाद्यंगीकाराच्च । नन्वस्मत्पक्षेपिभवत्पक्षे समाख्यावत् ॐकारमभिध्यायीतेत्युपक्रमेश्रवणात्साम्यमेवेत्यतआह ॥ [१५।१३] त्रिमात्रेणेति ॥ [१५।१३] उपसंहारश्चगरीयानिति ॥ उपसंहारस्योपक्रमापेक्षयापश्चिमत्वेनव्याख्यानरूपत्वाद्बलीयस्त्वमितिभावः ॥ [१५।१४] प्रत्युक्तंभवतीति ॥ प्रमाणेऽन्यथाव्याख्यातत्वेनैतद्व्याख्यानस्यतद्विरुद्धत्वादितिभावः ॥ २ ॥ अनविप्रयुक्ताइत्यत्र एकोविशब्दोनिषेधार्थकः । नञ्द्वयंचास्तीत्यभिप्रेत्य विप्रयुक्ताइत्यादिनाक्षरार्थमुक्त्वाभिप्रायमाह ॥ [१५।१७] एकैकामेवेति ॥ [१६।१] उपासकोनीयतइति ॥ मंत्रेएकमात्रद्विमात्रोपासकयोः पृथिव्यंतरिक्षलोकप्राप्तौसर्वथास्वातंत्र्याभावज्ञापनार्थं टीकाकारैरन्वेतीतिमंत्रोक्तपदान्वयसंभवेपि नीयतइतिकर्मणिप्रयोगःकृतः । ऋगाद्यभिमानिदेवानामेवतत्तल्लोकप्रापणेईश्वरदत्तंकिंचित्स्वांत्र्यमस्तीतिसूचयितुंच । ज्ञानार्थकस्यविदेश्चुरादिणिजंतस्य व्याख्यानं जानंतीति । तस्माद्धेतुमतिणिचमंगीकृत्यव्याख्यानं ज्ञापयंतीति ॥ [१६।२] शांतंसुखोत्कर्षसीमांभूमिरूपमिति ॥ शंसुखमिति सुखनामसुशंशब्दस्यपाठात्सुखवाचित्वात्मुख्यामुख्यन्यायेनतस्योत्कृष्टपरत्वादंतशब्दस्यमर्यादार्थकत्वादितिभावः ॥ ३ ॥ ७ ॥ इतिपंचमप्रश्नप्रतिवचनं ॥ ७ ॥ ५ ॥ अथहैनंसुकेशाः ॥ [१६।४] शरीरिणश्चेति ॥ शरीराभिमानिनोजीवस्य

त्यर्थः ॥ परमेश्वराधीनत्वमभिहितमिति ॥ चतुर्थप्रश्नइतिशेषः ॥ सिंहावलोकनन्यायेनेति ॥ अनेनास्यप्रश्नस्यचतुर्थ प्रश्नानंतर्यमेवस्यादितिशंकानिरस्तावेदितव्या । ननुप्रश्नमात्रंविहायपूर्ववृत्तांतकथनस्यक्कोपयोगइत्यतआह ॥ प्रष्टव्यार्थइति ॥ बुभुत्सांबोद्धुमिच्छां । कोसलायां तन्नामनगर्यां ॥ अपृच्छतअपृच्छदिति ॥ पृच्छधातोःपरस्मैपदित्वात्श्रुतौव्यत्ययेनात्म नेपदप्रयोगइतिभावः ॥ षोडशकालमिति ॥ परमात्मज्ञानोपयोगिषोडशकलासहितं । नतुलिंगशरीरांतर्भूतषोडशकलामात्र सहितमित्याशयः । मंत्राणांलिंगशरीरानंतर्भावात् ॥ कोसौपुरुषइत्यादि ॥ यद्यपिसामान्यतएवप्रश्नःकृतः । तथापिप्रतिव चनानुसारेणेदंप्रश्नविवरणं । प्रत्यायितः विश्वासंप्रापितः ॥ पुरुषमिति ॥ परमात्मानमित्यर्थः ॥ १ ॥ शिष्टस्येति ॥ उर्व रितस्य कश्चासावितिप्रश्नेतरप्रश्नस्येत्यर्थः । षोडशकलाइत्यस्यव्याख्या ॥ सजीवस्यशरीरस्यभागाइति ॥ कलाशब्दस्य भागार्थत्वादितिभावः । अत्रभागशब्देनोपकारकंविवक्षितं । तेनपृथिव्यादीनांपंचानामपिभूतानांब्रह्मांडांतर्विद्यमानानांसंसृष्ट शब्दशब्दितानांअसंसृष्टशब्दशब्दितमहदादिव्यतिरिक्तानांकलात्वं ॥ तथाहि । भूतानांतावच्छरीरोपादानत्वमस्ति । यत्किंचि दिहलोकेस्मिन्देहबद्धंविशांपते । सर्वंपंचभिराविष्टंभूतैरीश्वरबुद्धिजैरितिशरीरस्यपांचभौतिकत्वोक्तेः । अतस्तेषांशरीरोपकारक त्वमवश्यंवाच्यं । उपादानानामुपादेयोपकारकत्वस्यतंत्वादौसुप्रसिद्धत्वात् । ततश्चपृथिव्यादीनांभूतानांकलात्वसिद्धिः । एवंजी वस्यशरीरप्रेरकतया श्रद्धापदोक्तास्तिक्यनिष्ठायाःयागादिविहितप्रवृत्तिहेतुत्वेन चक्षुरादींद्रियस्यप्रवृत्तावुपकरणत्वेन मनसःप्र वृत्तौप्रधानकारणत्वेन अन्नस्यशरीरस्थितिकारणत्वेन वीर्यस्यशरीरहेतुत्वेन तपसोजीवज्ञानादिहेतुतयासुखसाधनत्वेन ऋगादि

वेदरूपाणांमंत्राणांसम्यक्ज्ञानादिहेतुत्वेन कर्मणःपुण्यापुण्यरूपस्यसुखादिनिमित्तत्वेन लोकशब्दोक्तेंद्रियाश्रयगोलकानांशरी
रावयवत्वेन देवदत्तादिनाम्नोव्यवहारहेतुत्वेनसजीवशरीरोपकारकतयाकलात्वंबोध्यं । अत्रकिंचिज्जीवोपकारकं किंचिच्चशरी
रोपकारकं । सर्वथापिसजीवशरीररूपविशिष्टोपकारकत्वंसर्वेषांसमानमिति । कल्पादावीक्षांचक्रइत्यन्वयः । जीवस्यमोक्षोपयो
गिज्ञानार्थं प्रवृत्त्याद्यर्थंच शरीराणितावदुत्पादनीयानि । अतःशरीरोपयुक्ताःप्राणादिषोडशकलाःसृजानीतिईक्षांचक्रइत्यर्थः ।
इदंप्राणादिषोडशकलासर्जनं जीवानांशरीरेषुतत्तत्कालेपृथक्पृथगेव । नतुमहत्तत्वादिसृष्टिवदादिसृष्टानेकवारमितिज्ञेयं । प्रति
ष्ठःप्रतिष्ठितः ॥ [१६।११] यंनिमित्तीकृत्येति ॥ द्वारीकृत्येत्यर्थः ॥ [१६।१०] प्राणं जीवकलाभिमानिनमिति ॥ श्वासनिश्वासरूपप्राणनामि
कायाःकलायाःअभिमानिनंमुख्यप्राणमित्यर्थः ॥ [१६।२०] तंप्राणंनिमित्तीकृत्येति ॥ प्राणादितिपंचमीकर्मणि ल्यब्लोपेकर्मण्यधिक
रणेपंचमीवाच्येतिवार्तिकोक्तेः । निमित्तीकृत्येत्यनेनाप्रधानकारणत्वोक्तिः ॥ [१७।२] अन्नंनिमित्तीकृत्येति ॥ अन्नंस्थूलभागरूपंनि
मित्तीकृत्यअपादानीकृत्यसूक्ष्मभागोपादानकंवीर्यमित्यर्थः ॥ [१७।३] सुखसाधनमिति ॥ कृच्छ्रचांद्रायणादिकमितिशेषः ॥ [१७।५] सूचयं
तीति ॥ पंचम्याःल्यब्लोपनिमित्तत्वस्यविवक्षितत्वात् । सामान्यकारणार्थत्वप्रतीतेर्लोकेष्वित्यत्रनिमित्तसप्तमीविवक्षणाच्चेति
भावः । कर्मेतिपुष्करःप्रोक्तइतिभाष्येउषाइतिसांतःशब्दः तदर्थस्त्वश्विनोर्भार्येति । पर्जन्यः द्वादशादित्येष्वेकः । स्वाहाअग्ने
र्भार्या । अनिरुद्धएवानिरुद्धकःकामपुत्रइत्यर्थोद्रष्टव्यः ॥ [१७।७] इत्यस्यैवविवरणमिति ॥ अतोनपुनरुक्तिरितिभावः ॥ [१७।८] यथासंभ

वमिति ॥ त्वचःप्राणः जिह्वायावरुणः घ्राणस्याश्विनौ तथावाचोग्निः पाण्योर्दक्षः पादयोर्जयंतः पायोर्मित्रः गुह्येंद्रियस्यमनु
रित्येवमित्यर्थः । ननुश्रद्धायावक्ष्यमाणक्रमानुरोधेनमनोमात्रकारणत्वोक्तेःसर्वोत्पत्तिलयकारणत्वंकथमुच्यतेभाष्येइत्यतआह ॥
[१७।१५] पूर्वोत्पन्नानामिति ॥ ननुतंज्ञात्वेत्येतत्कस्यव्याख्यानमित्यप्रतीतेराह ॥ [१७।१०] तंज्ञात्वेत्यनेनेति ॥ उत्तरत्रोदाहरिष्यमाणोमंत्रइ
त्यर्थः ॥ [१७।१२] तत्रमनसोनंतरमिति ॥ उत्तरत्र एतस्मादित्यनुवृत्तेः प्राणान्मनउत्पन्नं । मनसःइंद्रियाण्युत्पन्नानि । तेभ्यःपंचम
हाभूतानीत्यर्थप्रतीतेरित्यर्थः ॥ [१७।१३] प्रबलेविशेषेति ॥ निर्णायकत्वेनसूत्रस्यप्राबल्यात् इंद्रियापेक्षयामनसःपूर्वोत्पत्तिकथनेनविशे
षवचनत्वाच्चतत्सहकृतैतस्मादितिमंत्रेणेत्यर्थः । तत्प्राक्श्रुतेश्चेतिसूत्रार्थस्तु मनइंद्रियेभ्यःपूर्वमुत्पद्यते मनःसर्वेंद्रियाणिचेतिश्रु
तेः । पूर्वंमनःसमुत्पन्नंततोन्येषांसमुद्भवइतिस्मृतिवचनाच्चेति ॥ [१७।१५] योज्यमिति ॥ वरुणःसृष्टइत्यत्रविद्यमानःजातशब्दपर्यायः
सृष्टशब्दःतस्मादग्निस्ततोवरइत्यत्रविद्यमानोवरशब्दश्चपंचम्यंतात्परोयोज्यइतिभावः ॥ [१७।१५] उपलक्षणमिति ॥ उपलक्षणस्याज
हत्स्वार्थत्वेन कामस्यततोऽवरत्वेनात्रग्रहणासंभवेपिपूर्वोक्ताइतिबहुवचनोपपत्तिः । मनोभिमानित्वेनपरंपरयाअवरत्वेनकामस्या
पिग्रहणाद्वा ॥ [१७।१६] इंद्रइत्यपीति ॥ उपलक्षणमित्यनुवर्तते । कामाहंकारिकप्राणादयोपिकेचिदिंद्रियाभिमानिनोग्राह्याइत्यर्थः ।
ननुप्रकृतजडचेतनात्मककलासुमध्येचेतनानांमंत्रादेश्चानादित्वेनकथमुत्पत्तिः । कथंचसाक्षादवरत्वमित्यतआह ॥ यथायोग्य
[१७।१८] मुत्पत्त्यादीति ॥ चेतनेषूत्पत्तिर्देहतः जडेषुस्वरूपतः क्वचिदभिमानव्यक्तिः । आदिशब्दात्क्वचित्साक्षा त्क्वचित्परंपरयाऽत्र

रत्वंग्राह्यं । सकाशादित्यनुक्तौतस्येत्यस्यानन्वयात्सकाशादित्युक्तं । वरुणस्याभिमन्यमानानुक्तेराह ॥ [१७।१६] वीर्यदेवतेति ॥ सृष्टइ
त्यस्योत्पादितइत्यर्थत्वे ततइतिपंचम्यनन्वयादाह ॥ [१७।१६] ततउत्पन्नइति ॥ भूतवाय्वभिमान्याहंकारिकप्राणस्यगणेशादुत्तमत्वेन
तज्जन्यत्वतदवरत्वयोरसंभवान्निमित्ता त्ततोवायोःसुतोमरुदित्युक्तंभाष्ये तदप्रतीतेर्व्याचष्टे ॥ [१७।१७] मरुद्भूतवायुदेवतेति ॥ वा
योः प्रवहवायोःसुतोमरुत् मरुन्नामकःभूतवायुदेवतात्रविवक्षितइतिभावः । मरुत्पदेनैवाभिमन्यमानंलब्धमित्याशयेनवाह ॥
मरु द्भूतवायुदेवतेति ॥ अस्मिन्पक्षेवायोःप्रवहस्यसुतोभूतवायुदेवतेत्यर्थोज्ञेयः । तस्मादग्निःपाकाख्यइत्यत्रततइत्यधिकमि
त्याशंक्यतदर्थमाह ॥ [१७।१७] ततोमरुदुत्पत्त्यनंतरमिति ॥ [१८।१] उत्तमत्वमात्रमिति ॥ शतगुणादिपरिमितोत्तमत्वमित्यर्थः ॥ पूर्ववा
[१८।२] क्येपीति ॥ एतस्माज्जायतेप्राणइतिपूर्वोदाहृतवाक्येपीत्यर्थः । अतोनतारतम्यविरोधइतिभावः ॥ [१८।४] स्रवंत्योगच्छंत्यइति ॥
स्यंदूप्रस्रवणइतिधातोर्गच्छंत्यइतितात्पर्यकथनं । समुद्रायणाइत्यत्रायपयगतावितिधातोर्भावेल्युटिसमुद्रंप्रतिअयनंगमनमासाम
स्तीतिनित्ययोगेऽर्शआद्यजितिभावेनाह ॥ [१८।४] समुद्रगमनस्वभावाइति ॥ अस्तमिति ॥ असुक्षेपइत्यतःनपुंसकेभावेक्तइति
क्तप्रत्ययइतिभावः ॥ [१८।५] नामरूपेगंगायमुनाइत्यादिलक्षणेइति ॥ नामशब्दात्मकं रूपंतद्वाच्यार्थात्मकमित्यर्थः । नतुरूपश
ब्देनशुक्लादिकंगृह्यतइतिज्ञेयं ॥ [१८।५] तद्भेदइति ॥ तन्नाशइत्यर्थः । पुरुषइत्येवंप्रोच्यतइत्यत्रविशेष्यादर्शनात्तदध्याहरति ॥ [१८।६] यदन
ष्टंचैतन्यमिति ॥ एवंदृष्टांतेपितदुदकलक्षणंवस्त्वित्यत्रापिसंगतिर्द्रष्टव्या । अकलोमृतोभवतीतीतिशब्दस्यपुरुषैक्यमुच्यतइ

तिपूर्वेणान्वयः ॥ तदेतत्कथमिति ॥ यस्मिन्नेताइतिवाक्येनभेदसापेक्षंकलानांमुक्तौपुरुषाश्रयत्वमभिधाय यथेत्यादितद्विवरणपरेवाक्येतद्विरोध्यभेदवचनंकथमित्यर्थः । इत्यतइत्यस्यभेदएवसमर्थ्यतइतिभावेनाहेत्यनेनान्वयः । यथेत्यादिवाक्यस्यभेदसमर्थनपरत्ववचनेनोत्तरवाक्येतद्विरोध्यभेदःकथमुच्यतेइतिशंकानिरासेपि तत्रभेदसमर्थस्यकिंफलमित्याशंक्य यस्मिन्नित्यादिवाक्येमुक्तकलानांपुरुषाश्रितत्वोपयुक्ततयाभिमतभेदस्यानुपलभ्यमानतया यस्मिन्नित्यनेनभेदसापेक्षाश्रयाश्रयिभावोक्तिरयुक्तेत्याशंकानिरासफलकत्वात् यथेत्यादिवाक्यकृतभेदसमर्थनस्यनवैयर्थ्यमित्यभिप्रेत्याह ॥ मुक्तेश्वरभेदस्येति ॥ अनुपलभ्यमानत्वात् प्रमाणेनेतिशेषः ॥ यस्मिन्नितितदुक्तिरिति ॥ भेदसापेक्षाश्रयाश्रयिभावोक्तिरित्यर्थः ॥ इतिशंकापरिहारायेति ॥ इत्याशंक्यप्रतिवचनकर्त्रापिप्पलादेनभेदएवसमर्थ्यतइत्यर्थः । नत्वभेदउच्यतइत्येवकारार्थः । केचित्तु ॥ तदेतत्कथमितीति ॥ तत्तस्मात्सप्राणमसृजतेत्यादिवाक्यस्यप्राणादिदेवानांविष्णोश्चमुक्तौतारतम्यकथनपरत्वेनकथंव्याख्यानमित्यतइत्यस्यभेदएवसमर्थ्यतइतिभावेनाहेत्यनेनान्वयः । मुक्तेश्वरभेदस्यात्रानुपलभ्यमानत्वादिति समुद्रइत्येवंप्रोच्यतइतिमूलस्यसंगत्यंतरं ॥ अस्यार्थः । यस्मिन्नितिभेदप्रयुक्ताश्रयत्वोक्तिःकथं । अस्मिन्प्रकरणेभेदस्याप्रतीतेरित्याशंकापरिहारायचेति । अस्यापिभेदएवसमर्थ्यतइतिभावेनाहेत्यनेनान्वयःइतिव्याचक्षते ॥ तथाहिवक्ष्यतीति ॥ अस्तगमनंत्वादित्यवदज्ञानामविज्ञेयत्वमेवेत्यनेनेत्यर्थः ॥ नाशोर्थइति ॥ मुद्गरेणघटोभिद्यतइत्यादौतथाप्रतीतेरितिभावः ॥ अनुमानेनेति ॥ मूले अर्थतइत्यनेनार्थापत्तिरूपानुमानं

गृह्यते । अर्थापत्तिरित्यत्रार्थादापत्तिः । अर्थात् लिंगदर्शनात् आपत्तिःप्रमारूपंज्ञानं । यथापीनत्वदर्शनेनरात्रिभोजनज्ञानं । तथाघटोभिद्यतइत्यत्रानुपपद्यमानदर्शनात् घटावयवविभागदर्शनात्घटस्यनाशोवगम्यतइत्यर्थापत्तिरूपानुमानेननाशोवगम्यत इत्युक्तंभवति ॥ [१९।२] अद्रव्यत्वादिति ॥ घटादिवत्प्रत्यक्षेणप्रतीयमानावयवविभागशून्यद्रव्यत्वादित्यर्थः । यद्वाऽवयवानारब्धद्र व्यत्वादित्यर्थः । एतच्चदार्ष्टांतिकाभिप्रायेणोक्तमितिमंतव्यं ॥ [१९।४] तद्विरोधादिति ॥ पृथक्त्ववाचकभेदशब्दविरोधादित्यर्थः । अत्रवाक्ये समुद्रपुरुषपदयोरुभयोरपिसप्तम्यंतत्वोपपादनोपसंहारः । उपपादकस्यभेदशब्दविरोधस्य प्रथमांतत्वांगीकारेशब्द द्वयसाधारण्यादितिभावः । अतएवसमुद्रादिपदमित्युक्तं । उत्तरवाक्येतुकेवलपुरुषपदस्यैवसप्तम्यंतत्वोपपादनोपसंहारः । उ पपादकवाक्यशेषयुक्तेःतन्मात्रनिष्ठत्वात् । अतएवपुरुषपदस्येत्येववक्ष्यति । अतःपुरुषइतिभाष्ये भिन्नानिभिन्नानीतिनपुंसक लिंगपदयोःनामानिरूपाणीतिपूर्वोक्तपदाभ्यामावृत्ताभ्यामन्वयोबोध्यः । श्लोकार्थमाह ॥ [१।४] अराइति ॥ वेद [११।४] यथाः जानीध्व मिति ॥ उत्तरत्रमावइतिबहुवचनप्रयोगात्वेदयथाइत्येकवचनंव्यत्ययेनबहुवचनंकृतं । तेषांमोक्षफलोक्तेःतत्साधनज्ञानस्यापे क्षितत्वात्णिजपिस्वार्थेकृतः । मध्यमपुरुषबलात्हेशिष्याइत्यध्याहृतं । संमतित्वेनोदाहृतस्यपिप्पलादवाक्यत्वाभावात्कस्यचि द्वाक्यमित्युक्तं ॥ [१९।७] मापरिव्यथयत्विति ॥ नभयंप्रापयतु । नसंचालयतु तत्वज्ञानादितिशेषः । व्यथभयसंचलनयोःइतिधा तोःअंतर्णीतण्यर्थस्यलेटिपरिव्यथाइतिरूपं । अत्रनिषेधार्थकोमाशब्दः । तेनमाङ्योगाभावात्माङिलुङितिनलुङ् । अनेनैवाश येनटीकायांनिषेधार्थकमाशब्दंप्रयुज्यपरिव्यथाइत्यस्यप्रतिपदंपरिव्यथयत्वितिलोडंतंप्रयुक्तं ॥ [१९।८] एवंचेदिति ॥ उक्तरीत्याभेदपरंचे

दित्यर्थः ॥ [११।८]प्रांक्सूचितमिति ॥ समुद्रंप्राप्यास्तंगच्छंतीत्यस्य पूर्वभाष्येअज्ञैरनवगतानीत्यर्थानुवादेनास्तंगच्छंतीत्यस्याज्ञैरनवगतत्वमेवार्थइतिसूचितमितिभावः। आदित्यवदितिभाष्ये तत्रतस्यैवेतिषष्ठ्यंताद्वतिः । यथामेरोरुत्तरभागेविद्यमानस्याप्यादित्यस्यास्तगमनंनामदक्षिणादिक्स्थैरविज्ञेयत्वमेव । तथामुक्तकलानांपरमपुरुषेऽस्तगमनं संसार्यविज्ञेयत्वमित्यर्थः । समाख्ययापीत्यपिशब्दःप्रागुक्तोपपत्तिसमुच्चायकः ॥ [११।१०]मंदुक्तार्थेपीति ॥ समुद्रप्रविष्टनदीनांब्रह्मप्रविष्टमुक्तानांनामरूपाभावइत्यर्थः ॥ वर्जनार्थतायांइति [११।११] ॥ विर्लयेचविशेषेचवैपरीत्यादिषुस्मृतइतिएकाक्षररत्नमालायांविशब्दस्यवैपरीत्यार्थत्वोक्तेः । मुक्तवैपरीत्यस्यमुक्त्यभावरूपत्वात्नामरूपसाहित्यस्यैवप्रतीतेरित्यर्थः ॥ [११।१२]नचसमासानुपपत्तिरिति ॥ विशब्दस्यवर्जनार्थत्वेमुक्तशब्दस्यपुरुषवाचित्वात्समासांतरानुपपत्तेर्बहुव्रीहेरपिनामरूपादितिपंचम्यंतेनानन्वयेनानुपपत्तिरितिभावः ॥ [११।१३]भावेवेति ॥ नपुंसकेभावेक्तइत्युक्तेरितिभावः । तदेवस्पष्टयति ॥ [११।१३]ततश्चेति ॥ भावप्रधानपक्षेतुविगतंमुक्तंमुक्तत्वंतस्मादितिविग्रहोज्ञेयः ॥ अति[११।१३]चतुरश्रमिति ॥ सर्वथाऽनुपपत्तिशून्यमित्यर्थः ॥ [११।१४]अविहायेतियोज्यमिति ॥ नञ्प्रश्लेषंकृत्वेत्यर्थः ॥ अनंतत्वमुच्यत[११।१५]इति ॥ नाशराहित्यमुच्यतइत्यर्थः ॥ [११।१५]एवमेवार्थइति ॥ भिद्येतेचासांनामरूपेइतिदार्ष्टांतिकवाक्यस्येतिशेषः । भाष्ये यत्रपूर्वइतिवाक्यस्य यज्ञेनयज्ञमयजंतेतिपूर्वभागेनान्वयः । मंत्रार्थस्तु देवाःयज्ञेनज्ञानकर्मात्मकेन यज्ञंविष्णुं यज्ञोविष्णुर्देवतेतिश्रुतेः अयजंतपूजितवंतः । य[illegible]देवपूजासंगतिकरणदानेष्वितिधातोः । तानि तेदेवाः । प्रथमानिमुख्यानि धर्माणिधारका आसन्

अभवन् । नपुंसकत्वंच्छांदसं । तेदेवाः यत्रयस्मिन्लोकेपूर्वेसाध्यादेवाःब्रह्मादयःसंति । तत्रमहिमानःस्वयोग्यमाहात्म्योपेताः
नाकं कंसुखंतद्विरुद्धमकंदुःखं । तद्विरुद्धंअतिसुखं । सचंतेप्राप्नुवंतीति । अत्र पूर्वइतिबहुवचनप्रयोगात्मुक्तानांभेदसिद्धिः ।
सतत्रेतिवाक्ये स्त्रीभिर्वायानैर्वायुक्तः समुक्तःतत्रवैकुंठादौ पर्येतिपरितःएतिइत्युक्तेर्भेदसिद्धिः । सोश्नुतइतिवाक्येपि हृदयगुहा
यांनिहितंब्रह्मयोवेद सविपश्चिताब्रह्मणासहसर्वान्कामानश्नुते भुङ्क्ते । अत्रापिसहेत्युक्तेर्भेदसिद्धिः ॥ ऋचांत्वइतिमंत्रस्या
यमर्थः ॥ त्वःकश्चिद्ब्रह्मामुक्तःसन्नितिशेषः । ऋचांपोषंपुपुष्वान्पुष्टिंकुर्वन्नास्ते त्वःकश्चिद्ब्रह्मा शक्करीषुशक्करीच्छंदस्कासु गाय
त्रंसामगायति । त्वोब्रह्माजातविद्यांपौरुषेयविद्यांवदति । शिष्यान्प्रतीतिशेषः । त्वोब्रह्मा यज्ञस्यविष्णोःमात्रामंशंविमिमीते
जानातीति । ननुनामरूपेअविहायेतिअकारप्रश्लेषोनुपपन्नः । नामरूपेइत्यस्यद्विवचनत्वेनईदूदेद्विवचनंप्रगृह्यमितिप्रगृह्यसंज्ञक
त्वात्प्लुतप्रगृह्याअचिनित्यमितिप्रकृतिभावेप्राप्तेनामरूपेअविहायेत्येवनिर्देशःस्यादितिचेन्न । संज्ञापूर्वकोविधिरनित्यइतिसमाधान
स्यस्पष्टत्वात्तदनुक्त्वासमाधानांतरमाह ॥ [११।१६] श्रुतिविरोधादेवेति ॥ नन्वेतावताग्रंथेनाभेदखंडनेनभेदोपसंहारेकर्तव्येसर्वोत्तम
त्वोपसंहारःकुतःक्रियतइत्यतआह ॥ [११।१६] प्रसंगादिति ॥ एतत्प्रश्नप्रतिवचनस्यविष्णोर्मुक्तप्राणादिषोडशकलाधारकत्वेनसर्वोत्तम
त्वप्रतिपादनार्थंप्रवृत्तत्वेनतत्प्रतिपादनस्यैवमुख्यत्वात् अद्वैतखंडनपूर्वकंभेदसमर्थनस्यसर्वोत्तमत्वसिध्यर्थमेवकृतत्वात् । तेनत
स्यस्मृतत्वादितिभावः । एतदित्यस्यैवविवरणं ॥ [११।१७] उक्तलक्षणमिति ॥ सृष्ट्यादिकर्तृत्वादिलक्षणमित्यर्थः । एतावदेवाहमित्य

त्रोक्तैवकारव्यावर्त्यकथनं ॥ [११।१७] नातःपरंमयाविदितमस्तीति ॥ अहमेतावद्वेदेत्युक्तेस्वस्यसमग्रज्ञानाभावेपिअन्येषांसमग्रज्ञान

मस्तीतिप्राप्तावाह ॥ अस्मदादयइति ॥ आदिशब्देनरमाब्रह्मादयोगृह्यंते । जनकत्वाभावात्कथंपितृत्वमित्यतउपचारमाश्रि त्याह ॥ निरुपाधिकोपकारकइति ॥ अस्माकमस्मानिति ॥ कर्मणःशेषत्वविवक्षयाषष्ठीशेषइतिषष्ठीतिभावः । शेषत्वंना मसंबंधमात्रं । ननुपूर्वमनेनज्ञानोपदेशस्यकृतत्वात्तरणस्यवर्तमानत्वाभावात्तारयसीतिवर्तमानार्थकलट्प्रयोगःकथमित्यतआह ॥ तारयस्यतारयइति ॥ वर्तमानसामीप्येवर्तमानवद्वेतिश्रुतौलट्प्रयोगइतिभावः । अविद्यातारकस्यकथंनिरुपाधिकोपकारक त्वमित्यतआह ॥ कोहीति ॥ अत्रद्रव्यादिनोपकारकाणांतात्कालिकदुःखोपशामकानांबहुलमुपलंभेपि आत्यंतिकदुःखनिवर्त कानांविरलत्वादितिभावः । नमःपरमऋषिभ्यइत्युत्तरवाक्यंसुकेशादीनामितिभ्रांतिंवारयितुमाह ॥ एवमिति ॥ वेदद्रष्टुःपुरु षस्यरमाब्रह्मादिरूपत्वेनपिप्पलादादीनांतन्नीचत्वेनतन्नमस्कारायोग्यत्वादाह ॥ शिष्यशिक्षार्थमिति ॥ शिष्याणामध्ययना द्यंतयोर्गुरुनमस्कारःकर्तव्यइतिशिक्षार्थमित्यर्थः ॥ अतएवेति ॥ भाष्यकारस्यसर्वदाविष्णुनमस्कारशीलत्वाद्ग्रंथांतेनिबंधनस्य शिष्यशिक्षार्थत्वादेवेतिभावः । भाष्यस्थपदानामयमर्थः ॥ अतिशयेनप्रियंप्रेष्ठंशरीरादि । तस्मादतिशयेनप्रियंरमादि । ततो प्यतिशयप्रियायप्रेष्ठप्रेष्ठतमाय । परमाश्चतेनिरवधिकाश्चतेआनंदाश्च तेषांसंदोहःसमुदायः तेनसांद्रं शिरःकरचरणादिरू पेणस्थितं तच्चतत्आनंदवपुश्च । आनंदात्मकंशरीरं तदस्यास्तीतिपरमानंदवपुष्मान् तस्मै । तस्यप्रियमेवशिरइत्यादिश्रुतेरिति। अंतेपिजयतीर्थश्रीमच्चरणःमंगलंनिबध्नाति ॥ वचनेति ॥ कमलालक्ष्मीः । कमलाश्रीर्हरिप्रियेत्यमरोक्तेः महिला पत्नीयस्यस कमलामहिलः तेनकमलामहिलेन । अन्यपदार्थस्यकमलामहिलत्वंकुतइत्यतउक्तं ॥ पूरुषेण पूर्णषड्गुणत्वात्परमपुरुषेणेति ।

।मल।मालानर्माण नाधिकारः अतउक्तं ॥ वचनेति ॥ वचनानिप्रसूनानीव वचनान्येवप्रसूनानीतिवासमासः । कमलापतेरे ताद्दशमालाधारणेनकिंप्रयोजनमित्यतउक्तं ॥ सदयइति ॥ भक्तानुकंपयैवधारणमितिभावः ॥ षट्प्रश्नोपनिषद्भाष्यटीकाव्याख्यानमात्रतः ॥ इंदिरारमणःप्रीतिंयातुमध्वार्यहृद्गतः ॥ ७ ॥ ७ ॥ इतिषष्ठप्रश्नप्रतिवचनं ॥ ७ ॥ इतिमंकालधर्माचार्येण रचितंषट्प्रश्नभाष्यटीकाविवरणंसमाप्तं ॥ ७ ॥

अयं ग्रंथः कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण मुंबय्यां निर्णयसागरमुद्रणालये मुद्रयित्वा प्रकाशितः.
शाकः १८२९ सन १९०७.

॥ षट्प्रश्नमंकालीयंसंपूर्णम् ॥